[(l. 1) [illegible] — (l. 3) [illegible] न हि [illegible] न [illegible] — (l. 5) [illegible] — (l. 7) [illegible] — (l. 9) [illegible] — (l. 10) [illegible]]

[illegible]

216A* [illegible] ।
[illegible] ।

[illegible]

26 a) B (except B1) Dn D3 11 12 G1 C3 च (G1 त्त) कर्कटी (C3 om त्त), D1 हि कर्कटी (m हि वृश्चिकी); Cv कर्कटी (as in text). Cf. C3 कर्कटी जलचरो जन्तु 'केकडा' इति प्रसिद्ध [illegible] — b) B1 D6 सुमध्यमे (for शुचि°). S तव शुभ्रू इहागम (T G3 M1 सहागम; G1 समागम) — After 26, S ins.:

217* अनुमानये त्वां भैरन्ध्रि नापमन्ये कथंचन ।
भर्तुर्नारीमयादस्मै तव वासं न रोचये ।

27 D1 2 S सैरंध्री (for द्रौपद्यु°) — a) S नाहं शक्या वि° — b) B Dn D3 e 10-12 कदाचन; D1 5 तु केनचित्. S नापि चान्येन (G2 न चैवान्येन) केनचित्. — After 27ab, S ins.:

218* देवगन्धर्वगर्भेण मुख्य गुणेन चेतसा ।
[M1 2 मुख्य (for मुख्ये)]

— M1 om. 27c–28b — c) T1 G2 3 °र्वा पाल्यते मां; T2 °र्वा गोपयते मां, G1 M (M1 om.) °र्वा पालयते मां — d) B1 4 D 5 भामिनि. b युवत्या (T1 G1 °युवा; T2 M4 म°; G3 M1 °कन्या) पञ्च युवा

28 M1 om. 28ab (cf. v. l. 27) — ab) S (M1 om.) पुत्रा देवादिदेवानां मूर्धपादनरर्षभ (G3 °नर्षभ; M1 सुमध्यमे, sup. lin. °नर्षभ) — d) D2 दुःखाचारया. N हि (P2 D3 तदि; D3 m as in text) (for नु) — For 28cd, S (M1 cur. line 1) subst.:

219* यथा तु [illegible] मां [illegible] ।
स [illegible] गुणैर्हीन ।
[illegible] हि [illegible] ।
[illegible] ।
[illegible] न [illegible] । [5]
न [illegible] न च [illegible] ।
[illegible] ।
[illegible] मे [illegible] ।
नाहं [illegible] न च मे [illegible] ।

29 a) S [illegible]; T G1 [illegible]; C [illegible] (as in text) — c) [illegible], B1 Dn D11 12 [illegible]; [illegible] D5 [illegible]; Ds [illegible]; G1 [illegible]; M1 [illegible]; M2 [illegible]

न चाप्यहं चालयितुं शक्या केनचिदङ्गने ।
दुःखशीला हि गन्धर्वास्ते च मे बलवत्तराः ॥ ३१
सुदेष्णोवाच ।
एवं त्वां वासयिष्यामि यथा त्वं नन्दिनीच्छसि ।
न च पादौ न चोच्छिष्टं स्प्रक्ष्यसि त्वं कथंचन ॥ ३२
वैशंपायन उवाच ।
एवं कृष्णा विराटस्य भार्यया परिसान्त्विता ।
न चैनां वेद तत्रान्यस्तत्त्वेन जनमेजय ॥ ३३ C. 4. 279 B. 4. 9 37 K. 4 14 83

इति श्रीमहाभारते विराटपर्वणि अष्टमोऽध्यायः ॥ ८ ॥

---

30 [a]) B4 D2 गृध्येद्, D10 गृध्र्येत्, Ca.c.v as in text. — [b]) G3 अन्या, M1.2 अन्य B D (except D4 6) T1 G M3 Ca प्राकृता स्त्रिय॰ (G2 प्राकृता स्त्रिय) — [c]) B1 Dn D10–12 निवसेत्, B4 D5 सवत, D1.8 वसतो; D4 स हृतो, D8 स्ततो, S स इमा (for स ततो) B3 (m as in text) राज्ञो (for राज्ञि) — [d]) Ś1 K transp प्रविशेत् and अपरा B1.3 Dn1 D10 प्रविश्य च परां तनु Cn (in prose order) परां तनु प्रविश्य, C3 अपरां तनुं प्रविशेत् Ca cites अपरा तनु, Co परां

31 [d]) D10 न (for च) D4 एव (for मे) B1.3 (m as in text) दयिता प्रिया॰, B2 D T2 M (except M5) Cv बलवत्प्रिया , G1.3 बलिन प्रिया B4 बलवंतश्च मे प्रिया — After 31, K2 B Dn D1–7 9–12 ins

220* प्रच्छन्नाश्चापि रक्षन्ति ते मा नित्यं शुचिस्मिते ।
[D4 ॰श्चास्तेभिरक्षति नित्य मां तु शु॰]

On the other hand, S ins after 31

221* एव निवसमानाया मयि मा ते भय ह्यभूत् ।
वैशपायन ।
एवमुक्ता तु सैरन्ध्र्या सुदेष्णा वाक्यमब्रवीत् ।

32 S om. सुदेष्णोवाच — [b]) K D7 नंदनि, Ca.c नन्दिनि (as in text) — [d]) Ś1 K1 प्रेक्षसे, K2 प्रोक्षिसे (sic), B3 स्पृश्यसि, Dn2 D8.11.12 प्रेक्षसि, D4 स्पृशसि; D5 प्रेक्ष्यसि B2 कदाचन, D4 समन्तयं — For 32, S subst

222* त्वमेह मयि कल्याणि यदि ते वृत्तमीदृशम् ।
कश्च ते दातुमुच्छिष्ट पुमानर्हति शोभने ।
प्रधावयेच्च क पादौ लक्ष्मीं दृष्ट्वेव बुद्धिमान् ।

[(L. 1) G1 M1.2 यदि (for मयि) T G2 व्रत (for वृत्तं) — (L 3) T2 इह, G2 M4.5 इव (for एव)]

S cont

223* एवमाचारसपन्ना एव दैवपरायणा ।
रक्ष्या त्वमसि भूताना सावित्रीव द्विजन्मनाम् ।
देवता इव कल्याणि पूजिता वरवर्णिनि ।
त्वम भद्रे मयि प्रीता प्रीतिर्हि मम वर्तते ।
सर्वकामैः समुदिता निरुद्विग्नमना सुखम् । [5]

[(L. 1) T2 G1.3 देव॰ (for दैव॰) — (L 2) T1 G2 M2 4 त्वमपि M3 विजानता, M3.4 द्विजातिनां — (L. 3) G2 M5 ॰वर्णिनी — (L. 4) M2 वर्तने, M4 (*sup lin* as in text) वर्धते — (L. 5) T2 G प्रमुदिता]

33 [ab]) D8 ॰रक्षिता (for ॰सान्त्विता) S सुदेष्णयैवमुक्ता सा सुप्रीता चारुहासिनी — After 33[ab], K2 B D (except D1–8) ins

224* उवास नगरे तस्मिन्पतिधर्मवती सती ।,

while S ins

225* निर्विशङ्का विराटस्य विवेशान्तःपुर तदा ।
याज्ञसेनी सुदेष्णा तु शुश्रूषन्ती विशा पते ।

— [cd]) D7 9 चैता B4 D8 transp तत्रान्य॰ and तत्त्वेन D8 तत्वत (for तत्त्वेन) S अवसत्परिचारार्हा सुदुःख जन॰. — After 33, S ins

226* एव विराटे न्यवसन्त पाण्डवाः
कृष्णा तथान्तःपुरमेत्य शोभना ।
अज्ञातचर्या प्रतिरुद्धमानसा
यथाग्नयो भस्मनिगूढतेजस ।

Colophon. — *Adhy name* B D Ca द्रौपदीप्रवेश॰; T2 M3 द्रौपदीसुदेष्णासमागम॰ (M3 ॰सुदेष्णासंवाद), M3.4 नगरप्रवेशे द्रौपदीसुदेष्णासंगम॰ (M4 ॰सवाद॰), M5 द्रौपदीनगरप्रवेश॰ M4.5 cont नगरप्रवेश॰ समाप्त॰ (M5 ॰श ॰ह) — *Adhy no* (figures, words or both) Ś1 D2 4 7, K B4 D9 10 8, Dn1 D5 6 (*sup lin*) 11.12 9, S 13 — *S'loka no* G3 84.

9

☞ For sequence of adhy in S cf. v 1. 4 7 11

1 For 1–4[ab], S subst a passage given in App I (No 8) — [b]) Ś1 K1 B2 5 D5 वेश — [d]) D6 ॰ट समुपाययौ, D7 9 ॰टमुपजग्मिवान्, Ca as in text — After 1, N ins

९

वैशंपायन उवाच ।
सहदेवोऽपि गोपानां कृत्वा वेषमनुत्तमम् ।
भाषां चैषां समास्थाय विराटमुपयादथ ॥ १
तमायान्तमभिप्रेक्ष्य भ्राजमानं नरर्षभम् ।
समुपस्थाय वै राजा पप्रच्छ कुरुनन्दनम् ॥ २
कस्य वा त्वं कुतो वा त्वं किं वा तात चिकीर्षसि ।
न हि मे दृष्टपूर्वस्त्वं तत्त्वं ब्रूहि नरर्षभ ॥ ३
स प्राप्य राजानममित्रतापन-
स्ततोऽब्रवीन्मेघमहौघनिःस्वनः ।
वैश्योऽस्मि नाम्नाहमरिष्टनेमि-
र्गोसंख्य आसं कुरुपुंगवानाम् ॥ ४
वस्तुं त्वयीच्छामि विशां वरिष्ठ
तान्राजसिंहान्न हि वेद्मि पार्थान् ।
न शक्यते जीवितुमन्यकर्मणा
न च त्वदन्यो मम रोचते नृपः ॥ ५
विराट उवाच ।
त्वं ब्राह्मणो यदि वा क्षत्रियोऽसि
समुद्रनेमीश्वररूपवानसि ।
आचक्ष्व मे तत्त्वममित्रकर्शन
न वैश्यकर्म त्वयि विद्यते समम् ॥ ६
कस्यासि राज्ञो विषयादिहागतः
किं चापि शिल्पं तव विद्यते कृतम् ।
कथं त्वमस्मासु निवत्स्यसे सदा
वदस्व किं चापि तवेह वेतनम् ॥ ७
सहदेव उवाच ।
पञ्चानां पाण्डुपुत्राणां ज्येष्ठो राजा युधिष्ठिरः ।
तस्याष्टशतसाहस्रा गवां वर्गाः शतं शताः ॥ ८
अपरे दशसाहस्रा द्विस्तावन्तस्तथापरे ।

तेषां गोसंख्य आसं वै तन्तिपालेति मां विदुः ॥ ९
भूतं भव्यं भविष्यच्च यच्च संख्यागतं क्वचित् ।
न मेऽस्त्यविदितं किंचित्समन्ताद्दशयोजनम् ॥ १०
गुणाः सुविदिता ह्यासन्मम तस्य महात्मनः ।
आसीच्च स मया तुष्टः कुरुराजो युधिष्ठिरः ॥ ११
क्षिप्रं हि गावो बहुला भवन्ति
न तासु रोगो भवतीह कश्चित् ।
तैस्तैरुपायैर्विदितं मयैत-
देतानि शिल्पानि मयि स्थितानि ॥ १२
वृषभांश्चापि जानामि राजन्पूजितलक्षणान् ।
येषां मूत्रमुपाघ्राय अपि वन्ध्या प्रसूयते ॥ १३

विराट उवाच ।
शतं सहस्राणि समाहितानि
वर्णस्य वर्णस्य विनिश्चिता गुणैः ।
पशून्सपालान्भवते ददाम्यहं
त्वदाश्रया मे पशवो भवन्त्विह ॥ १४

वैशंपायन उवाच ।
तथा स राज्ञोऽविदितो विशां पते
उवास तत्रैव सुखं नरेश्वरः ।
न चैनमन्येऽपि विदुः कथंचन
प्रादाच्च तस्मै भरणं यथेप्सितम् ॥ १५ C. 4 286 B. 4 10.16 K. 4 13.23

इति श्रीमहाभारते विराटपर्वणि नवमोऽध्यायः ॥ ९ ॥

(except B.) Dn D2-8 11.12 गवा, M4 (*sup lin*) ॰ज्ञा (for क्वचित्)

11 a) B1-3 Ca गुणै, Cv as in text. B4 Dn2 D6 11 12 T2 G1 om हि — b) T G1.3 मया, Cv मम (as in text) — c) T G अमकृत् (for आसीच्च) D1-3 transp. च and स Dn1 D6.10 S दृष्ट (M2 घृष्ट) — After 11, S ins

228* अनेकगुणिता गावो दुर्विज्ञेया महत्तरा ।
बहुक्षीरतरा गावो बहव्र सद्य सपुत्रका ।

[(L 1) G2 M1-4 अनेक(G2 ॰न, M4 ॰का)गणिता — (L. 2) T2 G1 3 ता वै (for गावो) T2 यद्वपत्या (for बहव्र सद्य) T1 सत्य, G1.3 सति, G2 सम्यक् (for सद्य) T G1 सुपुत्रिका, G2 M4 सुपुत्रका]

12 a) B3 Dn D2 4-9.11 12 S च (for हि) T1 G2 न तासु (for भवन्ति) — b) Ś1 K1 चासु, D1 3 गोषु B2-5 Dn D6 8 11.12 कश्चन (for कश्चित्) T1 G2 रोगा भवतीह नॅष्ट केचिन — c) Ś1 K1 B5 D4 5 11 12 T2 G1 2 M4 (*sup lin*) 5 मयै॰ (as in text), the rest समै॰

13 a) B (except B4) Dn D1 5 6 9-12 S ऋषभान् B2 3 D1-4 8 10 T2 G1 M4 5 om. च T1 G2 3 M1-3 एव, M5 अभि॰ (for अपि) — d) D3 10 T1 G2 ह्यपि (for अपि) — After 13, S ins

229* वैशंपायन ।
मत्स्याधिपो हर्षकलेन चेतसा
माद्रीसुत पाण्डवमभ्यभाषत ।
नैवानुमन्ये तव कर्म कुत्सितं
महीं समग्रामभिपातुमर्हसि ।
अथ त्विदानीं तव रोचित विभो
यथेष्टतो गव्यमवेक्ष मामकम् ।
त्वदर्पणा मे पशवो भवन्तु वै
नृपो विराटस्तमुवाच सत्तमम् ।

[(L. 5) T2 G2 3 रोचते (for रोचित) — (L 6) T सत्तम॰]

14 S om. विराट उ॰ — a) T1 G2 3 गवा समात्र, T2 M गवा समास्ति, G1 समास्ति वै गवा — b) B1.5 सवर्ण वर्णस्य, B3.4 Crp वर्गस्य वर्णस्य, D4 वृषस्य वर्णस्य, D5 6 10 Ccp r वर्गस्य वर्गस्य, D8 वर्णस्य वर्ण, Crp वर्णस्य वर्णस्य (as in text) B D4-7 9 10 Cr वि(B2 सु)निश्चितानि, D1 8 च निश्चिता गुणै, D2 समाहिता गुणै, D6 Crp विनिश्चितान्गुणै, S पृथग्गणाना (G1 M2 ॰ग्जनाना, M1 ॰ग्गुणाना) Ś1 Dn D11.12 सवर्णवर्णस्य विमिश्रितान्गुणै॰ (Ś1m वर्णस्य वर्णस्य विमिश्रिता गुणै) — c) D7 9 च गोपान्, D8 सुपालान्, Ca as in text. K D4-8 भवतो S ददामि (M2 3.4 ॰नि) तेह वरमीप्सित यत् (M4 ते इत वर यदीप्सित) — d) B4 तदाश्रया, S त्वदर्पणा (T1 G2 ॰णान्) D4 M1 5 om इह D10 T G M2-4 इति (for इह)

15 a) Ś1 उवाच, Dn2 D5 7 9.11 12 तदा स, D4 तत स K2 D8 राजा, B4 Dn2 D1 3.5 9 11.12 राज्ञा, Cn राज्ञो (as in text) Ś1 K B1.2 Dn D4 6 7 विशा पते॰, D8 महात्मना — b) B2 4 D1-4 7 9 सुखी Ś1 नरेंद्र, K1 D2 10 ॰श्वर, K2 ॰श्वर, B2 Dn D7 9 11.12 नरोत्तम, B4 नरोत्तम, B5 D5 जनेश्वर — c) D5 नरा न च (for न चैनम्) Dn2 D12 एतम्; D4 एवम् (for एनम्) Ś1 तु, D1-3 अत्र (for अपि) D4 8 10 विविदु॰ (for ऽपि विदु).

१०

वैशंपायन उवाच ।
अथापरोऽदृश्यत रूपसंपदा
स्त्रीणामलंकारधरो बृहत्पुमान् ।
प्राकारवप्रे प्रतिमुच्य कुण्डले
दीर्घे च कम्बू परिहाटके शुभे ॥ १
बहूंश्च दीर्घांश्च विकीर्य मूर्धजा-
न्महाभुजो वारणमत्तविक्रमः ।
गतेन भूमिमभिकम्पयंस्तदा
विराटमासाद्य सभासमीपतः ॥ २
तं प्रेक्ष्य राजोपगतं सभातले
सत्रप्रतिच्छन्नमरिप्रमाथिनम् ।
विराजमानं परमेण वर्चसा
सुतं महेन्द्रस्य गजेन्द्रविक्रमम् ॥ ३
सर्वानपृच्छच्च समीपचारिणः
कुतोऽयमायाति न मे पुरा श्रुतः ।
न चैनमूचुर्विदितं तदा नराः
सविस्मितं वाक्यमिदं नृपोऽब्रवीत् ॥ ४
सर्वोपपन्नः पुरुषो मनोरमः

— ^{d}) D10 स (for च) B2 नरद्व. (for यथेप्सितम्) — For 15, S subst
230* एवं विराटेन समेत्य पाण्डवो
लब्ध्वा च गोवल्लवतां यथेष्टतः ।
अज्ञातचर्यामवसन्महात्मा
यथा रविश्चास्तगिरिं निविष्टः ।,
followed by 4 11 13 (q v)

Colophon — *Adhy name* B D (except D12) सहदेवप्रवेश , T2 G2 सहदेवसमागम , G1 विराटसहदेव संवाद , M2 3 सहदेवविराटसमागम , M6 सहदेवनगरप्रवेश — *Adhy no* (figures, words or both) Ś1 K B4 D6(*sup lin*) 10 9 (as in text), D9 8, D11 10, S 12 — *S'loka no* D1 16

10

☞ For sequence of adhy in S of v 1 4 7. 11

1 ^{a}) S वर्णगान्युवा (T2 वर्णसंपदा) (for रूप°) — ^{b}) D7 9 बृहन्नडा (for बृहत्पुमान्) S स्त्रीवेषधारी समलंकृतो भृशं — ^{c}) Ś1 प्राकारवक्ष , D1–3 स्थित्वा च वप्रे, S प्रवाळचित्रे, all comm as in text K B3 m D1–5 8 9 T2 M3 Cap प्रविमुच्य, Cc परि°, Ca 6 as in text — ^{d}) S उभे (for दीर्घे) Ś1 K D1 3 4 7–9 Cc परिहारके, S (except T2) °पादुके, Cr s v as in text S तथा (for शुभे) — After 1, T G ins

231* कृष्णे च दीर्घे च नियम्य वाससी
शरीरवान्दाशरथिर्बृहस्पतिप्रभः ।

2 ^{ab}) G2 केशाग्र्यं (for दीर्घांश्च) B1 8 (m as in text) च निमुच्य, Dn C8 vp प्रविकीर्य, D4 प्रविमुच्य Cv cites विकीर्य (as in text) D1 Cn बाहू च दीर्घान्प्रविकीर्य मूर्ध° (Cn in prose order) Ś1 D8 वारणराजविक्रम , B6 Dn1 D1.6 °तुल्य°, D7 9 S मत्तगजेन्द्र° D1 reads 2^{ab} twice and D2 reads it thrice D1 2 बाहू(D2 °हु)श्च दीर्घां(D2 °र्घां)श्च विकीर्ण(D2 °र्य)मूर्धजान्दीर्घां च वेणीं विदधे महाबल , D2 स दीर्घकेशः प्रविकीर्य मूर्धजान्दीर्घां च वेणीं विदधे महाबल , D1 2 स दीर्घकेशः प्रविकीर्य मूर्धजान्महाभुजो वारणमत्तविक्रम — After 2^{ab}, T G ins

232* कुत्स्येन वेषेण न भाति भाति च
महाभिपन्नो नभसीव चन्द्रमा ।

— ^{c}) K B2 D3–5 भूमीम्, T G चोर्वीम् K अतिकम्प°, B1 6 Dn D1 11 12 प्रति°, B4 S परि°, D2 ह्यभि°, D4 अपिक°, D7–10 सम° — ^{d}) M1 5 आयाच (for आसाद्य)

3 ^{b}) Ś1 K मंत्रप्र°, B2.5 Dn1 D11.12 व्याजाप्र°, B4 D7 9 छद्मप्र°, Dn2 वस्तुप्र°; D3 स त प्र°, D4 सत्वप्र°, D6 छद्मप्र°, T G1 M2.5 तत्र प्र°, G2 3 तत परि°, Ca c v as in text Cr cites only सत्र Ś1 अरिमर्दन (sic), K अरातिमर्दन, T1 G1 M1 अमित्रघातिन — After 3^{ab}, D3 repeats 2^{ab} (with v 1 as in D2) — ^{c}) D1–3 विभ्राजमान, M2 विराटराज (for विराज°) B2 °ण तेजसा, D4 S सुरराजवर्चस (D4 °सा) — ^{d}) Ś1 K D10 नरेंद्रस्य, D4 S सुरेंद्रस्य (for महेन्द्रस्य) D1–3 यथा धरागत, D6 गजेंद्रगामिन, D9 महेंद्रवि°, Ca as in text

4 ^{a}) D1 2 नरान् (for सर्वान्) B1 D1.2 6 10 G2 3 M6 स, D4 स्व (for च) Dn1 सभासु°, M6 समीपवर्तिन — ^{b}) B Dn D6–7 9–12 transp न मे and पुरा Ś1 K transp पुरा and श्रुत — ^{c}) D1 6 10 एवम् (for एनम्) S transp तदा and नरा — ^{d}) Ś1 सुविस्मित, K1 B2.4 D1–3 5–8 10 स विस्मितो, B1 2 5 Dn D4 11.12 S सविस्मय

श्यामो युवा वारणयूथपोपमः ।
विमुच्य कम्बू परिहाटके शुभे
विमुच्य वेणीमपिनह्य कुण्डले ॥ ५
शिखी सुकेशः परिधाय चान्यथा
भवस्व धन्वी कवची शरी तथा ।
आरुह्य यानं परिधावतां भवा-
न्सुतैः समो मे भव वा मया समः ॥ ६

वृद्धो ह्यहं वै परिहारकामः
सर्वान्मत्स्यांस्तरसा पालयस्व ।
नैवंविधाः क्लीबरूपा भवन्ति
कथंचनेति प्रतिभाति मे मनः ॥ ७
अर्जुन उवाच ।
गायामि नृत्याम्यथ वादयामि
भद्रोऽस्मि नृत्ते कुशलोऽस्मि गीते । C. 4 305 B. 4 11.8 K. 4 11.18

D1-3 जगाद (for अब्रवीत्) — After 4, S ins a passage given in App I (No 9)

5 For S cf v 1 7 — Before 5, D1-4 ins विराट उ° — a) B Dn D 8 9-12 मत्वो° (for मवौं°) Ś1 B1.2.. Dn D5 .. 8 11.12 °पोमरोपम — b) D4 वारण मत्तविक्रम — After 5ab, D5 ins

233* जानीत कोऽयं मम दर्शने स्थितो
यत्कारणं ते तनुमता समाश्रितम् ।
एवं वितर्कं त्वमनिरगतस्तिन
मधाप्य राजानममित्रहाब्रवीत् ।
बृहन्नडाह नरदेव नर्तकी
त्वां सेवितुं त्वनुदमोपयामि ।
त्वं मां भजस्वाद्य यथा त्वदागतां
भजामि ते पार्थिव नर्तकी ह्यहम् ।

— c) Ś1 B1 Dn D11.12 आमुच्य, D4 निर्मुच्य (sic) K D1 2-4.7-9 °हाटके — d) D4 विमुच्य (sic) B1 मम नह्य, D1.2.8 अपनह्य, D7.9 उपनह्य, Ca as in text

6 For S cf v 1. 7 — a) Dn1 D3 2.3 m.7-10 स्रग्वी, D1 सुखी (for शिखी) B (B1.3 both marg as in text) D7 8 सुकेशी, D3 सुवेष. — b) B1-2.3 Dn D11.12 शुशोभ; B4 D2 6 8 Cr शोभस्व, D1 2.10 शोभेत, D2 शोभेथ, D4 9 वाभ्योय, D7 शोभसु (for भवस्व) B1.2.3 Dn D10-12 यथा, D4 रथी (for तथा) — After 6ab, D5 reads 4 11 3cd (for the first time) — d) D1.2 सुरैः (for सुतैः) D1-3 त्वं, D7 9 स्याद् (for मे) Dn2 D1-4 11 (before corr) 12 भविता, D7 9 अथवा (for भव वा) Ś1 मे (for वा)

7 For S see below — a) Ś1 अस्मि (for हि) D1-4 8 9 परिहर्तुं°, D6 Ca परिहातुं°, D10 प्रतिहार°, Cs as in text. Cr cites -हातु, Crp (Dev) -हार- — b) B2 अनुपालय, D1.2 पालय त्वं B3 4 D2 8 मत्स्यांस्तु° (D2 मत्स्यान्, D8 °श्च) मत्स्यान् परि(D8 मम)पाल° — d) D4 10 मति (for मनः) — For 5-7, S subst

234* नार्हस्तु वेषोऽयमनूर्जितस्ते
नायुष्मतामर्हो नरदेवसिंह ।
तवैव वेषः शुभवेषभूषणै-
र्विभूषितो भूतपतेरिव प्रभो ।
विभाति भानोरिव रश्मिमालिनो
घनावरुद्धे गगने रवेरिव ।
धनुर्हि मन्ये तव शोभयेद्भुजौ
तथा हि पीनावतिमात्रमायतौ ।
प्रगृह्य चापं प्रतिरूपमात्मनो
रक्षस्व देशं पुरमद्य सुस्थित ।
पुत्रेण तुल्यो भव मे बृहन्नले
वृद्धोऽस्मि चित्तं प्रतिपादयामि ते ।
त्वं रक्ष मे सर्वमिदं पुरं प्रभो
न षण्ढता काचन लक्ष्यामि ते ।
प्रशाधि मत्स्यांस्तरसाभिवर्धय-
न्ददामि राज्यं तव मत्स्यनागाहम् ।
वैशंपायनः ।
तस्याग्रतः स्थानि धनूंषि पार्थिवो
बहूनि दीर्घाणि च वर्णवन्ति च ।
दर्शो स सज्यानि बलान्वितानि
जिज्ञास्यमानः किमयं करिष्यति ।
ततोऽर्जुनः क्लीबतरं वचोऽब्रवी-
न्न मे धनुर्धारितमीदृशं प्रभो ।
न चापि दृष्टं धनुरीदृशं क्वचि-
न्न मादृशाः सन्ति धनुर्धरा भुवि ।

[(L. 1) M2.4 (*sup lin* as in text) 5 नाहं स्ववेषा-वृतमूर्जितं मनः (M5 °तासु) — (L 10) T G1 3 सुस्थिर — (L. 15) T1 G2 3 M3 तपसा (for तरसा) M1.2.5 प्रवर्ध° (for भिवर्ध°) — (L 18) G1.2 वर्णयति च, M1.2 वर्जयन्निव, M3-5 वर्णयन्निव — (L. 19) M शुभज्यानि (for स स°) — (L 20) M जिनाम्नार्थं M1.3 करोति च (for करि°)]

8 G2 om 8 T G1.3 M om अर्जुन उ D4 बृहन्नडा

त्वमुत्तरायाः परिदत्स्व मां स्वयं
भवामि देव्या नरदेव नर्तकः ॥ ८
इदं तु रूपं मम येन किं नु त-
त्प्रकीर्तयित्वा भृशशोकवर्धनम् ।
बृहन्नडां वै नरदेव विद्धि मां
सुतं सुतां वा पितृमातृवर्जिताम् ॥ ९
विराट उवाच ।
ददामि ते हन्त वरं बृहन्नडे
सुतां च मे नर्तय याश्च तादृशीः ।
इदं तु ते कर्म समं न मे मतं
समुद्रनेमिं पृथिवीं त्वमर्हसि ॥ १०
वैशंपायन उवाच ।
बृहन्नडां तामभिवीक्ष्य मत्स्यराट्
कलासु नृत्ते च तथैव वादिते ।
अपुंस्त्वमप्यस्य निशम्य च स्थिरं
ततः कुमारीपुरमुत्ससर्ज तम् ॥ ११

---

d — a) S (G2 om) नृत्यामि गायामि च वादयाम्यह — b) D7 भद्रा and कुशला N (except Ś1) नृत्ये B2 D8 10 भद्रोस्मि गीते कुश° नृत्ये, S (G2 om) प्रनर्तने (T G3 प्रणर्तने, G1 प्रनृत्तके) नैपुणकौशलं मम — c) S (G2 om) तद् (for त्वम्) K2 B D उत्तरायै, G1 उत्तरा मे Ś1 B3 5 Dn1 D10 प्रदिशस्व, K B2 4 D1-8 T1 G1 3 M Ca परि(T1 प्रवि)धत्स्व, B1 Dn2 D1-9 11 12 T2 Cc as in text Crp (Dev) cites -धत्स्व, Crp (Cat) -दत्स्व S (G2 om) नर्तक (T2 G1 M1 °न, M5 °ने) (for मां स्वयं) — d) M1 तेह (for देव्या) T1 नर्तके, M1 नर्तना, M3 नर्तका, M4 नर्तन D1-8 °मि देव्यास्तव नर्तको ह्यहः M5 °मि राजेंद्र कुरुष्व तत्तथा

9 S om 9 — a) Ś1 इमं च, D8 इम तु (for इद तु) B2 3 D7-9 Crp (Dev) vp समयेन, D4 मम किं नु; Cr मम येन (as in text) K2 केन तत्, B1 3 D6 किं तत्; B4 D1-3 5 किं नु तत्, Dn1 D10 किं तव, Dn2 D11 12 किं नु, D4 येन तव, D7-9 केनचित् (for किं नु तत्) Cap cites इद तु रूप समयेन किं नु तत् — b) B (except B5) D8 Cap प्रकीर्तयिष्ये; D1-3 प्रतर्कयित्वा, D7 प्रकीर्य राज्ञो; D9 प्राप्त हि राज्ञो D4 6 8 मम (for भृश) Cf Ca इद रूप येन केनचित् प्रकीर्तितं मम शोकवर्धनम्, Cn 3 येनेद रूप मम (C3 मम रूप) तत्कीर्तन व्यर्थं (Cn adds शोककर च), Cv इद तु रूप येन केनचित् and कीर्तयित्वा मेऽतिशयेन शोकं वर्धयति — c) B Dn2 D5 6 11 12 बृहन्नला, D1-3 Cvp बृहदला, Cv as in text Ś1 B1 4 5 Dn D6 9-12 मा (for वै) B2 3 D4 5 7 8 transp वै and मां Ś1 B1.4 5 Dn D6 9-12 om मा — d) K2 D1 3 शुभैर्विहीना; D4 समागता हि, Cc r सुत सुता वा (as in text) Ś1 °वर्जित

10 a) K1 B3 M1-3 4 (sup lin) ददानि D6 7 8 तेह तु; T1 G2 M2 5 तेह हि; G3 M3 ते त हि (for ते हन्त) G1 °मि तेह परम बृ° MSS बृहन्नले (or °ळे) and बृहद्दले also, cf v 1, 9 — b) S (except G2 3 M3) हि (for the first च) D4 नर्तयथास्, D10 दर्शय याश्च T1 G1 ताश्च, T2 ता (for याश्च) D4 T2 त्वम् (for the second च) D4 T2 ईदृशी, M तादृशा — After 10ab, T1 G1 3 ins

235* न मद्गृहे चास्ति भवान्यकिंचन (?)
प्रतीपकर्ता पुरुष स्त्रियोऽपि वा ।

T1 G1.3 cont T2 G2 M2-5 ins after 10ab M1 ins after 10

236* ततो विराट स्वयमाह्वयत्सुता
नृपाधिपस्तां च सुमध्यसुन्दरीम् ।
उवाच चैनां मुदितेन चेतसा
बृहन्नला नाम सखी भवत्वियम् ।
सुगात्रि सप्रीतिसुबद्धसौहृदा [5]
तवाङ्गने प्राणसमा च नित्यदा ।
प्रकामभक्षाभरणाम्बरा शुभा
चरत्विय सर्वजनेष्ववारिता ।
न दुष्कुलीना स्त्रियमाकृतिर्भवे-
न्न वृत्तभेदी भवतीदृशो जन । [10]

[(L 2) G2 M4 5 नरा° (for नृपा°) — (L 5) G1 2 सुगात्रस°, M4 5 सुबद्धसंप्रीतिनिबद्ध°]

T1 G1 (both om lines 3-4) 3 M (M5 om line 4) cont

237* इतीदमुक्त्वा पुरुषैर्यथाक्रम
परीक्ष्य राजा प्रमदाभिरागताम् ।
सुता च ता नर्तयितु शशास वै
बृहन्नला क्लीबमवेक्ष्य वेश्मनि ।

T1 G1 3 M cont T2 G2 ins after 236*

238* तथा समादिश्य सुता नराधिप
प्रवेशयता साधु गृह तवेति च ।

— S om 10c-11d — c) Ś1 K1 Dn2 D10-12 च (for तु) D1 3 स (for मे)

11 S om 11 (cf. v 1 10) — a) Hereafter the

स शिक्षयामास च गीतवादितं
　सुतां विराटस्य धनंजयः प्रभुः ।
सखीश्च तस्याः परिचारिकास्तथा
　प्रियश्च तासां स बभूव पाण्डवः ॥ १२

तथा स सत्रेण धनंजयोऽवस-
　त्प्रियाणि कुर्वन्सह ताभिरात्मवान् ।
तथागतं तत्र न जज्ञिरे जना
　बहिश्चरा वाप्यथवान्तरेचराः ॥ १३

इति श्रीमहाभारते विराटपर्वणि दशमोऽध्यायः ॥ १० ॥

११

वैशंपायन उवाच ।
अथापरेऽदृश्यत पाण्डवः प्रभु-
　र्विराटराज्ञस्तुरगान्समीक्षतः ।
तमापतन्तं ददृशे पृथग्जनो
　विमुक्तमभ्रादिव सूर्यमण्डलम् ॥ १
स वै हयानैक्षत तांस्ततस्ततः
　समीक्षमाणं च ददर्श मत्स्यराट् ।
ततोऽब्रवीत्ताननुगानमित्रहा　　C 4 313 B 4 12 2 K 4 12 2

---

variants of बृहन्नडा will be ignored D4 समवेक्ष्य (for अभि°) — ^{b}) K2 D- 8 10 नृत्ये च, B Dn D4-6 8 11. 12 नृत्येषु D7 9 वादने (for वादिते) D1-2 °नु नृत्येन च (D2 °त्स्वथ) गीतवादने (D2 °दिते) — After 11^{ab}, B1 Dn D11. 12 ins

　239* समक्ष्य राजा विविधं स्वमश्चिसि
　　　परीक्ष्य चैन प्रमदाभिराशु वै ।

(cf. 237*) — ^{c}) D4 निशाम्य, Cc s as in text D1. 3 च निश्चय (for निशम्य च) Ś1 वै (for च) K1 D- न्विन, D- अन्विय — ^{d}) Ś1 D5 6 °पुरे, Cv -पुर (as in text) K B1. 3 4 Dn1 D4-10 ताम्, D1-3 तत् (for तम्)

12 T2 om. 12^{ab} — ^{a}) K2 D1-3 8 गीतवादन (K2 °नं), D4 गीतनर्तन, D-9 G2 3 °दितां, M6 °दिते — ^{c}) D6 सख्याश्च, M सखीं M (except M-) °चारकम् B3 4 D- शुभा (for तथा) — ^{d}) S तस्या (for तासा) K1 G2 प्र (for स) D1-3 तयोचितान्यानपि तत्र पा

13 ^{a}) K2 तु, D2 T2 G3 च (for स) K मत्रेण, D2 यत्नेन, D2 S तत्रैव, D- वेषेण, Cs सत्रेण (as in text) N (except B2 4 D4-6 8) वसत् (for ऽवसत्) — ^{b}) D7 9 अर्जुन, Cv आत्मवान् (as in text) M3 सहमाभिराम°, M6 स सदाभिरामयन् — ^{c}) B1. 4 D- 9 यथा (for तथा) B Dn D1. 2 4 6-12 च त, D3 चगत् (for -गत) D- तथा चगत न हि ज° — ^{d}) K च, D- ये (for वा) Ś1 अथवान्तरे तदा, K2 Dn1 D4 8 अत्र चान्तरेचरा, B3 अथवा वने°, B4 तथान्तरे°, D10 M1-4 °वान्तरे जना, T G M6 अथ वे(G2 3 चे, M5 ने)न्तरेजना, B1 corrupt

Colophon — *Adhy name* B1 3 4 D2 10 धनंजयप्रवेश, B2 5 Dn2 D1-7 9 11 12 अर्जुनप्रवेश°, T2 G1 बृहन्नलाविराटसंवाद, M1-3 नगरप्रवेशे (M1 om. it) धनंजयविराटसमागम, M5 अर्जुननगरप्रवेश — *Adhy no* (figures, words or both) Ś1 K B4 D8 (*sup lin*) 9 10 S 10, D- 11 — *Śloka no* D1 13, G3 24

11

☞ For sequence of adhy in S cf. v 1. 4 7 11

1 T M1 2 om वैश° उ° — ^{a}) D5 G1 तथा (for अथ) D2. 9 पश्यत (for ऽदृश्यत) — ^{b}) Text as in K1 only! Ś1 B1 2 विराटराजस्, D2 °राज्ञा, S °राजे D1-3 विदुरोपमाकृति (D2 m तुरगा समीक्षित) Ś1 S समीक्षति, B1. 3. 4 D4 °क्षयन्, B2 निरीक्ष्यते, B5 D6 निरीक्षितु, D- समीक्षितु, D3 10 निरीक्षयन् Dn D11. 12 विराटराज तरसा समेयिवान्, D7 9 °राजेश्वरमतिकागत — ^{c}) G2 तदा (for तम्) T2 G1 आव्रजत (for आप°) D4 6 7 9 S ददृशु, and °जना Ca °जन (as in text) — ^{d}) S प्रमुक्तम्, and चन्द्रमण्डल — After 1, D- repeats 4 10 5^{ab}

2 ^{a}) T1 त (for स) D2 ईक्षत तान्, S निष्पतितान् (T2 निष्पतनात्). B2 D1. 2 4 S इतस्तत, D6 ततस्तु त, D2 10 च तत्वत (for ततस्तत) — ^{b}) Ś1 K1 समीक्ष्यमाण, T2 निरीक्ष°, Cc as in text Ś1 अपि, K1 Dn D11. 12 स, K2 स्स (for च) — ^{c}) B4 वशगान् (for अनुगान्) Dn1 नरेश्वर (for अमित्रहा) — ^{d}) Ś1 मनोरम प्रभु, B3 4 D10 नरोमरप्रभु, Dn1 D5 नरोमरोपम, D1-4 नरो गतव्यथ — For 2^{cd}, S subst

　240* दृष्ट्वा तथैन स कुरूत्तम तत
　　　पप्रच्छ तान्सर्वसमास्पदस्तदा ।

कुतोऽयमायाति नरोऽमरप्रभः ॥ २
अयं हयान्वीक्षति मामकान्दृढं
ध्रुवं हयज्ञो भविता विचक्षणः ।
प्रवेश्यतामेष समीपमाशु मे
विभाति वीरो हि यथामरस्तथा ॥ ३
अभ्येत्य राजानममित्रहाब्रवी-
ज्जयोऽस्तु ते पार्थिव भद्रमस्तु च ।
हयेषु युक्तो नृप संमतः सदा
तवाश्वसूतो निपुणो भवाम्यहम् ॥ ४

विराट उवाच ।

ददामि यानानि धनं निवेशनं
ममाश्वसूतो भवितुं त्वमर्हसि ।
कुतोऽसि कस्यासि कथं त्वमागतः
प्रब्रूहि शिल्पं तव विद्यते च यत् ॥ ५

नकुल उवाच ।

पञ्चानां पाण्डुपुत्राणां ज्येष्ठो राजा युधिष्ठिरः ।
तेनाहमश्वेषु पुरा प्रकृतः शत्रुकर्शन ॥ ६
अश्वानां प्रकृतिं वेद्मि विनयं चापि सर्वशः ।
दुष्टानां प्रतिपत्तिं च कृत्स्नं चैव चिकित्सितम् ॥ ७
न कातरं स्यान्मम जातु वाहनं
न मेऽस्ति दुष्टा वडवा कुतो हयाः ।
जनस्तु मामाह स चापि पाण्डवो

को वा विजानाति पुरास्य दर्शन
योऽय युवाभ्येति हि मामिकां सभाम् ।
प्रियो हि मे दर्शनतोऽपि संमतो
प्रवीतु कश्चिद्यदि दृष्टवानिमम् ।

[(L 1) M1–4 एव च, M5 हि च (for तथा) — (L. 5) M धर्मतो (for समतो)]

3 M om 3 — ^{a}) B Dn D1–3 5 6 8 10–12 T2 ईक्षति, D7 9 T1 G पश्यति (for वीक्षति) D1–8 कामगान्; T1 G मामिकान् T1 G मुहु° (for दृढ) Ś1 अय हयान्मामकानीक्षते वै D6 reads 3^{cd} here for the second time, reading it for the first time after 4 10 6^{ab} — ^{c}) T1 G वै (for मे) — ^{d}) K2 स्थित (for तथा) — For 4, S subst

241* वितर्कयत्येव हि मत्स्यराजनि
त्वरन्कुरूणामृषभ समागमत् ।
तत प्रणम्योपनत कुरूत्तमो
विराटराजानमुवाच पार्थिवम् ।
तवागतोऽह पुरमद्य भूपते
जिजीविषुर्वेतनभोजनार्थिक° ।
तवाश्वबन्ध° सुभृतो भवाम्यह
कुरुष्व मामश्वपतिं यदीच्छसि ।

[(L 2) M1 समागत, M2–5 सभामगात् — (L 7) M1 सुकृतो (for °भृतो)]

4 ^{a}) B3 4 D1–4 6 10 सोभ्येत्य Ś1 अथाब्रवीत्तदा (for अमित्रहाब्र°) — ^{b}) Ś1 B4 D1–7 9 ते, K2 B1–3 5 Dn D10–12 च (for च) — D1 8 om 4^{c}–5^{b} — ^{c}) Ś1 K D8 तथा, D2 तदा (for सदा)

5 D1 8 om 5^{ab} (cf v 1 4) — ^{a}) B4 D5 6 G2.3 M3–5 ददानि D6 रत्ना° (for याना°) D2 धन तवेप्सित, D5 T1 G धनानि वेतन, D10 निवेशन च ते — ^{b}) M5 न मा (for मम) T2 G1 अश्वबन्धो — ^{c}) Ś1 कस्यापि Dn1 कुत. (for कथ) B3 (m as in text) Dn1 D4 समा° (for त्वमा°) — ^{d}) S प्रवीहि (for प्रब्रूहि) B4 D3 om च Dn1 कृत, D1 8 च तत्, D4 ह यत्, D5 तु यत्, T1 हि यत्, M5 अनघ D6 प्रब्रूहि शिल्प त्वयि यच्च विद्यते

6 6^{ab}=4 9 8^{ab} — ^{b}) Ś1 B D भ्राता (for राजा) — ^{d}) B Dn D3 5 6 11 12 C6 नियुक्त°, D1 2 4 सत्कृत ; D7 9 T1 प्रयुक्त , T2 प्रक्लृप्त° (for प्रकृत) Some MSS °कर्षण

7 ^{c}) D3 M2 3 °ना प्रकृतिं चैव Cr s v प्रति° (as in text) — ^{d}) D1 8 सर्वं, M2 3 कर्म (for कृत्स्न) Ś1 D5 G3 अपि (for एव)

8 ^{a}) S (except T2) वाजि (for जातु); cf. 9^{a} — D10 (hapl) om 8^{b}–9^{a} — ^{b}) G2 M4 5 spell वडवा° — ^{c}) S (except G1) जानस्तु — ^{d}) Ś1 K2 °रो प्रथिक नामदेवत (K2 °देव), K1 °रो प्रथिकनामधर्मणा Cv cites (in prose order) दामतो ग्रन्थिकम् — After 8, S ins

242* मातलिरिव देवपतेर्दशरथनृपते सुमन्त्र इव यन्ता ।
सहसाहो जामदग्नेस्तथैव तव शिक्षयाम्यश्वान् ।
युधिष्ठिरस्य राजेन्द्र नरराजस्य शासनात् ।
शतसाहस्रकोटीनामश्वानामस्मि रक्षिता ।

[(L 2) T1 सुमहा इव, T2 सहसा इव, G1 3 M3 सह इव, G2 समभा इव (for सहसाहो) T2 G2 M1 2 जमदग्नेस्]

9 D10 om 9^{a} (cf. v 1. 8) — ^{a}) Ś1 यद्यस्ति D1 वाहनादिक; D3 वाहन कृत; D4 8 जातु वाहन (for वाजि°),

युधिष्ठिरो ग्रन्थिकमेव नामतः ॥ ८
विराट उवाच ।
यदस्ति किंचिन्मम वाजिवाहनं
तदस्तु सर्वं त्वदधीनमद्य वै ।
ये चापि केचिन्मम वाजियोजका-
स्त्वदाश्रयाः सारथयश्च सन्तु मे ॥ ९
इदं तवेष्टं यदि वै सुरोपम
ब्रवीहि यत्ते प्रसमीक्षितं वसु ।
न तेऽनुरूपं हयकर्म विद्यते
प्रभासि राजेव हि संमतो मम ॥ १०
युधिष्ठिरस्येव हि दर्शनेन मे
समं तवेदं प्रियदर्श दर्शनम् ।
कथं तु भृत्यैः स विनाकृतो वने
वसत्यनिन्द्यो रमते च पाण्डवः ॥ ११

वैशंपायन उवाच ।
तथा स गन्धर्ववरोपमो युवा
विराटराज्ञा मुदितेन पूजितः ।
न चैनमन्येऽपि विदुः कथंचन
प्रियाभिरामं विचरन्तमन्तरा ॥ १२
एवं हि मत्स्ये न्यवसन्त पाण्डवा
यथाप्रतिज्ञाभिरमोघदर्शनाः ।
अज्ञातचर्यां व्यचरन्समाहिताः
समुद्रनेमीपतयोऽतिदुःखिताः ॥ १३ C. 4 22; B. 4 12 13; K. 4 13 27

इति श्रीमहाभारते विराटपर्वणि एकादशोऽध्यायः ॥ ११ ॥

---

cf. 8a — b) B4 D4 मे (for वै) — c) D1-4 वाजि° वाहका, D6 °योधका, T1 G M1.2 वाजियोधा, T2 मुख्य° योधा, M3-5 वाजियोधा — d) D5 7 9 तु (for च) S om. मे

10 Ś1 K1 om. 10-11 — a) K2 D5 तु चेष्ट (for तवेष्ट) B2 D5 S त्विह(M4 sup lin °दि)त, D4 यदि वा — b) B3 D4.7 9 T M प्रब्रूहि (for ब्रवीहि) S वर (for वसु) — c) D4 S दृश्य° (for विद्य°) — d) D3 हि मे (for मम) S विभासि (M2.4 °ति) राजेव च कर्म वाजिनां

11 Ś1 K1 om. 11 (cf. v. l. 10) — a) B2 4 D4 6 11 12 T2 M1.2 एव (for इव) Dn D11 12 om. मे D5 10 वै (for मे) — b) B2 4 Dn1 D5 8-9 प्रियमत्र, Cv प्रियदर्श (as in text) K2 D2 10 M4 प्रियदर्शन मम (D5 तव), M5 प्रियरूपदर्शन — c) B1.2 Dn1 D6 8 11 T2 G2 M1-4 नु, D2 3 M5 स, D4 हि (for तु) D1-3 च, M1-2 सु (for स) D1.2 विना धनेन च (for विना° वने) — d) S चरति (for वसति) B4 अरण्ये, D5 अचिन्त्यो, T1 G2 3 अनिष्टो, G1 अनन्यो (for अनिन्द्यो) D1-3 हि वने, Cv रमते (as in text) D1-2 M3 स (for च) D9 वसन्वन घोरतर च पाडव

12 a) Ś1 K इत्थं (Ś1 एव) यथेष्ट हि सुरोपमो युवा — c) B2 D5 10 एवम् (for एनम्) B1.3 हि, D8 10 S (except G2 M2) त्वि (for ऽपि) B2 तदा जना (for कथ°) — d) B4 श्रियाभि°, G1 प्रिया हि काम, Cc as in text. S एकदा, Cc अन्तरा (as in text)

13 S reads 13 after 230* (cf. 4 9 15) — a) S विराटे (for हि मत्स्ये) Dn2 D11.12 निवसति, D3 निवसत, D5 अथ वसति, T1 G2 °सश्च, G1 3 M3 °सन्तु — b) S °विक्रमा (for °दर्शना) — c) D4 अज्ञातवासम्, T1 G2.3 M1-3 अबुद्ध°. D1 3 विरहन् (sic), D2 4 S चरितु, D8 विचरन् S यथातथ — d) S °नेमीमभित(T1 G2 3 °शा)स्तुमीश्वरा (T1 G2 °मुद्यता)

Colophon. — *Adhy name* Ś1 K1 नगरप्रवेश, B D नकुलप्रवेश°, G1 M3 नकुलविराटसंवाद° (M3 °विराटसमा° गम), M1.2 नगरप्रवेशे (M1 om. it) विराटनकुलसमागम — *Adhy no* (figures, words or both) Ś1 K B4 D6 (sup lin) 9 10 S 11, D4 10, D6.11 12 — *S'loka no* D8 12, G3 16

12

1 D3.8 om 1 — a) B (except B4) D (except D4.6, D3 8 om) एव ते मत्स्यनगरे (cf. v. l. 2), S एव विराटनगरे, Ca as in text — b) Dn1 प्रच्छन्ना, कुरु° नन्दना (= 2b), S वसत (M त ऊषु) सत्यविक्रमा° — c) D1.2 4 S नरव्याघ्रा° (for महा°) — d) K1 B Dn D1.6 9 11.12 T1 G °कुर्वत (cf. v. 1 2d) D5 भारता, D10 वै

१२

जनमेजय उवाच ।

एवं मत्स्यस्य नगरे वसन्तस्तत्र पाण्डवाः ।
अत ऊर्ध्वं महावीर्याः किमकुर्वन्त वै द्विज ॥ १

वैशंपायन उवाच ।

एवं ते न्यवसंस्तत्र प्रच्छन्नाः कुरुनन्दनाः ।
आराधयन्तो राजानं यदकुर्वन्त तच्छृणु ॥ २
युधिष्ठिरः सभास्तारः सभ्यानामभवत्प्रियः ।
तथैव च विराटस्य सपुत्रस्य विशां पते ॥ ३
स ह्यक्षहृदयज्ञस्तान्क्रीडयामास पाण्डवः ।
अक्षवत्यां यथाकामं सूत्रबद्धानिव द्विजान् ॥ ४
अज्ञातं च विराटस्य विजित्य वसु धर्मराट् ।
भ्रातृभ्यः पुरुषव्याघ्रो यथार्हं स प्रयच्छति ॥ ५
भीमसेनोऽपि मांसानि भक्ष्याणि विविधानि च ।
अतिसृष्टानि मत्स्येन विक्रीणाति युधिष्ठिरे ॥ ६
वासांसि परिजीर्णानि लब्धान्यन्तःपुरेऽर्जुनः ।
विक्रीणानश्च सर्वेभ्यः पाण्डवेभ्यः प्रयच्छति ॥ ७
सहदेवोऽपि गोपानां वेषमास्थाय पाण्डवः ।
दधि क्षीरं घृतं चैव पाण्डवेभ्यः प्रयच्छति ॥ ८
नकुलोऽपि धनं लब्ध्वा कृते कर्मणि वाजिनाम् ।
तुष्टे तस्मिन्नरपतौ पाण्डवेभ्यः प्रयच्छति ॥ ९
कृष्णापि सर्वान्भ्रातॄंस्तान्निरीक्षन्ती तपस्विनी ।
यथा पुनरविज्ञाता तथा चरति भामिनी ॥ १०

द्विजा , S पांडवा

2 D8 8 om वैश° उ° — a) Ś1 एव तत्र वसतस्ते, B4 D1-3 6-9 एव ते मत्स्यनगरे, B1 3 Dn1 D10 एव मत्स्यस्य नगरे (cf 1a and v 1) — d) K1 B (except B4) Dn2 D2 5 9 11 12 T G2 3 °कुर्वत (cf v 1 1d) — After 2, N ins

243* तृणबिन्दुप्रसादाच्च धर्मस्य च महात्मन. ।
अज्ञातवासमेव तु विराटनगरेऽवसन् ।

[(L 1) B1 2 3 (m as in text) D6 8 °बिंदो प्रसादेन (D8 °दाच्च), B4 5 D1-5 °प्रसादेन — (L. 2) B4 अज्ञात-वर्षम् Ś1 B4 Ca rp (Dev) एक; Cr एव (as in text) B1 3 °समेकांते, D1-4 अज्ञातचर्यामेकत्र; D8 °समवसन्; D10 °वासिकं ते तु D8 तदा (for ऽअवसन)]

3 b) Ś1 B Dn D2 5 7 9-12 मत्स्या° (for सभ्या°). K1 अवसत् (for अभवत) — c) M1-3 स (for च) — d) Ś1 विशेषत , K1 B4 विशा पते

4 G1 om 4a-5a — a) D5 च (for हि) D6 7 9 त (for तान्) Dn2 D11 12 स ह्यक्षकुशलस्तान्वै Ca स चाक्षहृदयज्ञः — b) K पार्थिव (for पाण्डव) — c) T2 G3 M4 5 अक्षयधान्; G3 °वधून्, M1. 2 °बद्धान्; M3 °वत्या D4 यथान्याय.

5 G1 om 5a (cf. v. l 4) — a) Dn1 D1 3 10 अज्ञातस्य (for °त च) — d) T M यथेष्ट (for यथार्हं) B3 (m as in text) Dn D3. 4 7-12 यथार्हं संप्र°; D1. 2 यथालब्ध प्र°; G यथेष्ट सप्र°

6 c) K अभिसृ°; D1. 3 अज्ञातानि च; D2 अनुज्ञातानि; Ca c.v as in text B3 m D5 Crp (Catur) मूल्येन, D9 (m as in text) मत्स्यस्य, T G2 M (except M5) मात्स्येन, Cr as in text — d) Ś1 B Dn D5-7 9 11 12 T2 विक्रीणीते T2 च वधुषु (for युधि°) T1 G M विक्रीणन्नाम भ्रातृषु

7 a) D4 च महार्हाणि; T G3 च महाबाहु ; Ca r v परिजीर्णानि (as in text) — b) K लब्ध्वापि, D7 9 T1 G2 3 लब्ध्वा हि; D8 लब्धा च (for लब्धानि) — cd) K2 T1 G M विक्रीणन्नाम; B1 3 4 D7 9 विक्रीणन्नथ, B3 D5 3 विक्रीणस्ति (D8° से)च; Dn2 D1 3. 11. 12 T2 विक्रीणाति च D4 भ्रातृभ्य पुरुषव्याघ्रो यथेष्ट सप्रय° — After 7, T1 G read 29-30 (for the first time)

8 D1-4 S transp 8 and 9 — ab) K गोपाल- (for गोपानां) Ś1 °पि गोपालान्वेशमानीय पा°, S °वो गवा नित्य (G1 कृत्ये) कृते मगलकर्मणि — S ins after 8ab

244* अध्यक्षत्वाच्च यल्लेभे राज्ञ कल्याणकार्यवान् ।
[T2 G3 M लब्ध (for लेभे)]

In G1, 244* is followed by a *repetition* of 8ab, with text reading — c) D1. 10 G3 क्षीरघृत

9 D1-4 S transp 8 and 9 — b) Ś1 तथा, K कृत्वा (for कृते) K कर्मणि, Ca v as in text. — After 9, S ins

245* विनीतानृषभान्दृष्ट्वा सहदेवेन भावितान् ।
स तु हृष्टश्च संप्रादात्तदा राजा धन बहु ।

10 D3 om 10 — a) B4 D7 च; Dn1 तु (for अपि) D8 T2 G2 भर्तॄन् (for सर्वान्) Dn2 D7 9 सर्वभर्तृंस् (for सर्वान्भ्रातॄंस्) B (except B4) D1. 2 10-12 T1 G1. 3 M3-5 भर्तॄंस; D8 T2 G3 सर्वांस् (for भ्रातॄंस्) — b) D7 9

एवं संपादयन्तस्ते तथान्योन्यं महारथाः ।
प्रेक्षमाणास्तदा कृष्णामूषुश्छन्ना नराधिप ॥ ११
अथ मासे चतुर्थे तु ब्रह्मणः सुमहोत्सवः ।
आसीत्समृद्धो मत्स्येषु पुरुषाणां सुसंमतः ॥ १२
तत्र मल्लाः समापेतुर्दिग्भ्यो राजन्सहस्रशः ।
महाकाया महावीर्याः कालखञ्जा इवासुराः ॥ १३
वीर्योन्नद्धा बलोदग्रा राज्ञा समभिपूजिताः ।
सिंहस्कन्धकटिग्रीवाः स्ववदाता मनस्विनः ।
असकृल्लब्धलक्षास्ते रङ्गे पार्थिवसंनिधौ ॥ १४
तेषामेको महानासीत्सर्वमल्लान्समाह्वयत् ।
आवल्गमानं तं रङ्गे नोपतिष्ठति कश्चन ॥ १५
यदा सर्वे विमनसस्ते मल्ला हतचेतसः ।
अथ सूदेन तं मल्लं योधयामास मत्स्यराट् ॥ १६
चोद्यमानस्ततो भीमो दुःखेनैवाकरोन्मतिम् । C. 4 344 B. 4 13. 20 K. 4 13. 25

वीक्षमाणा, Cv as in text. B2 D1 यशस्विनी, Ca v as in text — c) Ś1 पुनर्, G3 पुर, Ca पुनर् (as in text) K D1.3 इवाज्ञाता, B3 D5 8 Ca rp (Dev) इवाजाता, D2 इवादीता (sic), Cr अजातेव, Cc rp as in text Cv cites अजाता, Cvp अज्ञाता B1 यथा न ज्ञायते कश्चित् — d) Ś1 तथाचरत Ś1 भारत, B2.4 D5 6 भाविनी

11 a) K समारयतस्, T G समाव°, M स(M5 प्र)छाद°, Cc.s as in text — b) B1 3-5 Dn1 D1-3.5 8-10 T1 G1.2 तदा, D11 यथा (for तदा) D1-3 अ(D1 त्व)न्योन्य च (for तदान्यो°) Ś1 नराधिपा (for महा°) — After 11ab, K2 B D (except D1.8) ins

246* विराटनगरे चेरुः पुनर्गर्भधृता इव ।
मागता धार्तराष्ट्रस्य भयात्पाण्डुसुतास्तदा ।

[(L. 1) K3 चेह (for चेरुः) B3 D5 गर्भे धृता, D4 6 गर्भगता, D8 गर्भस्थिता, D10 गर्भसृता, C3 as above — (L 2) K2 B2-4 D2 5-7 9 10 मदाका, D4 8 प्रच्छन्ना] — c) D4 G1 M (except M5) मदा, D6 T1 तथा (for तदा) — d) B3 (m as in text) D7 9 सुप्रच्छन्ना, D4 सुमछन्ना, D5 सम्प्रच्छन्ना (for ऊषुश्छन्ना) B2 नरर्षभा ; D2 4 5.7-9 G3 M1.2 °धिपा ; D6 नरर्षभ, T2 महारथा — After 11, K2 D1-4 ins (an additional) colophon

12 Before 12, K2 D1-4 ins वैश° उ° (cf v 1 11) — b) Ś1 K2 M3 °ण स महो°, D2 °णस्तु महो°, D6 ब्राह्मणेषु महो°, T G M1 शङ्करस्य महोत्सव — c) T1 M (except M5) मात्स्येषु

13 a) D4 समाजग्मु — b) D4 S महाबला (for सह°) D2.3 नानादिग्भ्य समागता — After 13ab, N ins

247* समाजे ब्रह्मणो राजस्तथा पशुपतेरपि ।

[D1.8 समाजो, Ca r as in text D4 °जे देवदेवस्य B1 2.5 Dn D5 11.12 यथा, D1.3 तदा (for तथा) B2 3 m 5 Dn D5 5 8 11.12 इव (for अपि) ❀Cr यथा ब्रह्मण समाजे ब्रह्मलोके पशुपतेस्तथात्रापि पशुपते समाज इत्यर्थ ।❀]

— c) G3 °बला, M (except M2) °माया (for °काया) K महावीरा — d) B2-4 D5 6 कालकजा, S °केया. D8 10 यथा (for इव)

14 a) Ś1 D10 वीर्योदग्रा (see below), B Dn D5 11 12 Ca r वीर्योन्मत्ता, D1.7 9 S वीर्यवन्तो, D6 Co.rp (Dev) वीर्योद्धता, Crp (Cat.) वीर्योन्नद्धा (as in text) Ś1 बलोन्नद्धा (see above), D7-9 बलोपेता, Ca.c बलोदग्रा (as in text) — d) K2 सर्वोदाना, D2m अवदाता, D8 G3 स्ववदाता, Ca.c s v स्वव° (as in text) D5 8 मनीषिण°

15 ab) K सर्वान् (for सर्व-) Ś1 य आह्व°; K1 यथाह्व°, B D5 6 10 T1 M4(sup lin as in text) s समाह्वयन्, Dn D1.8 11.12 अथाह्व° D1-3 युयुत्समाना संरब्धा मल्ला अन्योन्यमाह्वयन् — c) K3 वल्गमानं तु, D1.3 आहूयमानास् (D3 °नास्), D2 आवल्गमानास्, D10 वल्गमान तु, Ca v as in text. D1-3 तान् (for त) S व्यावल्गमानो ददृशे — d) D1-4 3 °तिष्ठेत B4 D5 10 °ष्ठति केचन, S गर्जितो गतिभि (T2 G2 M3 गतवनो) स्थित (G3 °तोग्रगतिर्यथा) — After 15, D8 ins (for the first time) lines 10-14 of a passage given in App. I (No 11), followed by a *repetition* of 15, those lines (10-14) being repeated in their proper place On the other hand, D9 ins after 15

248* कीचकोऽपि तदा मल्ल व्यशेपयत नो बलात् ।

16 ab) S विप्रस्तमनस सर्वे मल्लास्ते हतचेतस (G1 °वै न किंचिदवदति ते) — After 16ab, S ins a passage given in App I (No 10) — c) D1-3 सूतेन, D8 10 मल्लेन, C5 सूदेन (as in text) D8 त सूद, D10 त सूत, G3 मल्लु वै — d) B3m चोदया°, D8 योजया°, G3 प्रेषया°. D4 S पार्थिव (for मत्स्यराट) — After 16, D4 ins

249* उभाभ्यामेव वर्षोऽभूत्तथा शैलौ परस्परम् ।,

followed by lines 7-10, 12-15 of App I (No 11), there follows

250* कीचकोऽपि तदा मल्ल योधयामास मत्स्यराट् ।

न हि शक्नोति विवृते प्रत्याख्यातुं नराधिपम् ॥ १७
ततः स पुरुषव्याघ्रः शार्दूलशिथिलं चरन् ।
प्रविवेश महारङ्गं विराटमभिहर्षयन् ॥ १८
बबन्ध कक्ष्यां कौन्तेयस्ततस्तं हर्षयञ्जनम् ।
ततस्तं वृत्रसंकाशं भीमो मल्लं समाह्वयत् ॥ १९
तावुभौ सुमहोत्साहावुभौ तीव्रपराक्रमौ ।
मत्ताविव महाकायौ वारणौ षष्टिहायनौ ॥ २०
चकर्ष दोर्भ्यामुत्पाट्य भीमो मल्लममित्रहा ।
विनदन्तमभिक्रोशञ्शार्दूल इव वारणम् ॥ २१
तमुद्यम्य महाबाहुर्भ्रामयामास वीर्यवान् ।
ततो मल्लाश्च मत्स्याश्च विस्मयं चक्रिरे परम् ॥ २२
भ्रामयित्वा शतगुणं गतसत्त्वमचेतनम् ।

(cf. 16^{cd} and 248*)

17 ^{a}) Ś1 K2 Dn D1-3 7-9 11 12 नोद्य°, B5 D6 प्रोच्य° (for चोद्य°) B2 Dn D4 5 11 12 तदा, D6 तथा (for ततो) D1-3 सूतो (for भीमो) — ^{b}) D7 9 सुदुःखेन (for दु गेनैव) K वृत्तिं, S पद (for मतिम्) — D3 om 17^{c}–18^{b} — ^{c}) T G2 3 M3 4 (*sup lin*) शक्नोमि, G1 शक्तोपि Ś1 वचसा; B D6 8 9 10 M Ca c v निवृत, D1. 2 निवृत्त, T G अशक्तोपि, Cs as in text

18 D3 om 18^{ab} (cf. v l. 17) — ^{b}) Ś1 K B Dn D4 6 8 10–12 Ca c r °शिथिलश्, G3 °सदृश D5 7 9 शार्दूलसमविक्रम — ^{d}) Ś1 B Dn D1-3 6 7 9–12 अभिपूजयन् D8 विराटेनाभिपूजित

19 D4 om 19 — ^{a}) S बद्धकक्ष्योथ (for बबन्ध कक्ष्या) Ś1 B (except B3) D Co r s कक्षा, Cnp कच्छां. Ca cites कक्ष D1-3 सूतोपि (for कौन्तेय) — ^{b}) Ś1 तथा, Dn2 सूद (for ततस्). Ś1 B D सहर्ष°, T G M4 तान्हर्ष° (for त हर्ष°) B1 S जनान् (for जनम्) — ^{c}) S (except T2) तत्र (for ततस्) Ś1 B1 2 5 Dn D11 12 T2 तु (for त) — ^{d}) D1 3 सूते; D2 ततो (for भीमो) D1-3 T G2 3 अथाह्वयत — After 19, N T2 ins

251* जीमूत नाम त तत्र मल्ल प्रख्यातविक्रमम् ।
[D7-10 नामतस् (for नाम त) B1 3 4 D4 6 8 विख्यात°, Dn2 T2 प्रथित° (for प्रख्यात°)]

On the other hand, S (except T2, T1 after line 3 of 253*) ins after 19

252* कक्षे मल्ल गृहीत्वा तु ननाद भुवि सिंहवत् ।
[T1 G बहु (for भुवि)]

20 ^{a}) M1 2 तु (for सु) — ^{b}) T1 तथा; G3 धीरौ (for उभौ) B5 Dn D11 12 भीम°, D5 तीक्ष्ण°, D10 प्रख्यातविक्रमौ, T1 स्वच्छ°, T2 G2 3 M तुल्य°, G1 यद्ध° (for तीव्र°) — ^{c}) M4 *sup lin* मदोन्मत्तौ (for महा°) — ^{d}) D1-3 10 T G M1-3. 5 सनिपेततु, D4 समपेततु M4 भीममल्लौ निपेततु — S ins after 20 (T2 ins, however, lines 3–4 after passage No 11 of App I)

253* वृषतुल्यपरौ वीरौ सिंहतुल्यपराक्रमौ ।
गजाविव मदोन्मत्तौ भीममल्लौ निपेततु ।
उत्पपाताथ वेगेन मल्ल कक्षे गृहीतवान् ।
पार्श्वे निगृह्य हस्तेन पातयामास मल्लकम् ।
[For line 2, M4 subst 20^{cd} — After line 2, T2 ins a passage given in App I (No 11) — (L 3) G2 अथोत्पपात (for उत्पपाताथ) M4 भीमस्तु (for वेगेन) — After line 3, T1 ins 252* — (L 4) G1 M1. 5 पार्श्वे G3 परिगृह्य च (for पार्श्वे नि°)]

On the other hand, N ins after 20 a passage given in App I (No 11), a passage which T2 ins after line 2 of 253*, for D3 cf v 1 16 also

21 ^{a}) Co उत्पाट्य — ^{c}) Ś1 K1 Dn D9 11. 12 T2 G1 निनदंतम्, D1-3 विनर्दंतम्, D6 वल्वतम्; D8 निर्नदतम् K2 T G2 अभिक्रोधात्, B3 D6 7 अतिक्रोशान्, D1-4 8 M5 अतिक्रोधात, D9 अभिक्रोध, D10 महाक्रो (sic), G3 M1-3 अभिक्रोशात् — ^{d}) D1 4 शार्दूलम् S (except T2) दारुण (for वारणम्)

22 ^{a}) K2 B3 5 Dn D6 11 12 समुद्यम्य; D7 9 तमु त्पाट्य D8 10 महावीर्य — ^{b}) M3 पात° (for भ्राम°) B2 D1-4 7 9 S पांडव — ^{c}) D1-3 तत्र (for ततो) M1-3 transp मल्ला and मत्स्या· D1-3 तु (for the first च) T G2 मात्स्याश् D1-3 तत्प्रेक्ष्य (for मत्स्याश्च) — ^{d}) G2 विस्मया, M1 2 विनाद D6 परम (for चक्रिरे) B2m जना, D5 गता; T G M4. 5 भृश (for परम्) — After 22, Ś1 ins

254* आकृष्टक्रोडीकरण प्रकर्षणमुदाहृतम् ।
आकर्षण लीलयैव संमुखीकरण स्मृतम् ॥
[This is a stanza cited by Nil in his comm on lines 17–18 of a passage given in App I (No 11)!]

23 ^{a}) Ś1 K भुजगत, Crp (Arj) शतपर; Ca r शतगुण (as in text) — ^{b}) K B1m 2 D4 7 9 10 अचेतस — ^{c}) Ś1 K प्रचिक्षेप, D1 4 7 9 प्रत्यपेपन् D5 महातेजा (for महाबाहुर्) D8 प्रत्यपेधन्महाबाहून् — D8 om 23^{d}–26^{a} — ^{d}) D5 मल्ल भीमो महाबल

प्रत्यपिपन्महाबाहुर्मल्लं भुवि वृकोदरः ॥ २३
तस्मिन्विनिहते मल्ले जीमूते लोकविश्रुते ।
विराटः परमं हर्षमगच्छद्बान्धवैः सह ॥ २४
संहर्षात्प्रददौ वित्तं बहु राजा महामनाः ।
बल्लवाय महारङ्गे यथा वैश्रवणस्तथा ॥ २५
एवं स सुबहून्मल्लान्पुरुषांश्च महाबलान् ।
विनिघ्नन्मत्स्यराजस्य प्रीतिमावहदुत्तमाम् ॥ २६
यदास्य तुल्यः पुरुषो न कश्चित्तत्र विद्यते ।
ततो व्याघ्रैश्च सिंहैश्च द्विरदैश्चाप्ययोधयत् ॥ २७
पुनरन्तःपुरगतः स्त्रीणां मध्ये वृकोदरः ।
योध्यते स विराटेन सिंहैर्मत्तैर्महाबलैः ॥ २८
बीभत्सुरपि गीतेन सुनृत्तेन च पाण्डवः ।
विराटं तोषयामास सर्वाश्चान्तःपुरस्त्रियः ॥ २९
अश्वैर्विनीतैर्जवनैस्तत्र तत्र समागतैः ।
तोषयामास नकुलो राजानं राजसत्तम ॥ ३०
तस्मै प्रदेयं प्रायच्छत्प्रीतो राजा धनं बहु । C. 4 369 B. 4 13. 44 K. 4 15. 60

---

24 D3 om. 24 (cf. v. l. 23) — a) K1 विहास्मिते, K2 विहस्मिते; D1 डिने हते, D2 विनिहिते Dn D11.12 वीरे (for मल्ले) — b) S (except T2) वज्रेणेव महाचले — K2 om. 24cd — d) B3 D4 7–10 G1 अगमत् Ś1 पांडवै सह, D5 सह बांधवैः (by transp.), S सह बंधुभिः

25 D3 om. 25 (cf. v. l. 23) — a) B Dn D11.12 प्रहर्षात्, D1.2.4 8 7–10 स हर्षात्, S हर्षाद्धि T1 G3 राजा (for वित्तं) — b) D1.2 महाधनं, D8 महामने T1 G3 वित्तं बहु महा° — Ś1 K om. 25cd — c) S वल्लाय (G2 °लोय)

26 D3 om. 26a (cf. v. l. 23) — a) Ś1 च (for स) — d) N (except Ś1) आहरद् (for आवहद्)

27 a) D1–3 तत् (for अस्य) B2 T1 G transp. तुल्य and पुरुष — b) B2 D1–3 भुवि (for तत्र) Dn2 D11.12 वर्त°; D1–3 S दृश्य° (for विद्य°) B1.3–5 D5 प्रत्यदृश्यत, D7 9 प्रतिदृश्यते (for तत्र विद्यते) — c) B1.2.5 D1.2.8.10 G1 तदा (for ततो) D6 transp. व्याघ्रैः and सिंहैः — d) D1–3 °दैः समयोधयत्, S (except T2) °दैश्चाप्ययुध्यत — After 27, S ins

255* विराटेन प्रदत्तानि रत्नानि विविधानि च ।
न्यितेभ्यः पुरुषेभ्यश्च दत्त्वा द्रव्याणि जग्मिवान् ।

[(L. 1) T G2 वस्त्राणि, M3 4 चित्राणि (for रत्नानि)]

28 ab) D1–3 M3 पुनरन्तःपुरे स्त्रीणां मध्यवर्ती (M3 मध्ये चैव) वृको° — c) D1.3 S युध्यते B1.3 6 Dn D4 8.9 11.12 स (for स्म) S विराटस्य — d) K2 S गजैः सिंहैः, D1–3 वृषभैः सिंहैः B3 D1.2 4 महागजैः, T G M4 महाबलैः

29 T1 G read 29–30 (for the first time) after 7, repeating them here — a) T G2 नृत्तेन (for गीतेन) — b) Ś1 स्वनृत्तेन, K1 D7 9 सुवृत्तेन, K2 सुयत्नेन, B D1.4–6 8 10 सुनृत्येन, Dn D11.12 स्वनृत्येन, D3 सुवृत्तेन, T G3 गीतेनापि; T1 G2 सुकृतेन (first time), G1.3 M नृत्तेनापि (for सुनृ°) — d) Ś1 B3 6 Dn1 D1–3 5 7 9 T1 (first time) 2 G1 (first time) 2 (second time) 3 (first time) M1.2 5 °पुरस्त्रियः (as in text), the rest °पुरे स्त्रियः

30 T1 G read 29–30 (for the first time) after 7, repeating them here — cd) B D transp. नकुलो and राजानं T1 (second time) 2 G3 (second time) विराटं (for राजानं) B1–3 5 Dn D11.12 नृपसत्तम (B1 °म, B3 5 °मः), D1–3 7–9 G2 (first time) राजसत्तमः; T1 (second time) 2 G3 (second time) °त्तमः, M2–4 राजसंमतः

31 ab) D4 प्रददौ (for प्रायच्छत्) S तस्मै देयं ददौ (G3 ततो) राजा बहु द्रव्यं शुभं मुदा — After 31ab, D8 ins

256* अरोगा बहुलक्षीरा दृष्ट्वा गावो नराधिप ।
प्रीतः प्रादान्महावित्तं मत्स्यराजो बली महान् ।

— c) S विनीतत्वं गवां दृष्ट्वा — d) D8 10 सहदेवाय, Ca as in text. Ś1 चाभिभूः, K1 D7 चाभिभो ; K2 चाविभो ; B1 Dn D3 9 m. 11.12 चाभितः, B2 3 D8 10 Crp (Arj) वा विभो, B4 वै प्रभो, B5 D5.6 वै विभो, D1.2 पार्थिव ; D4 च प्रभु, Cr च प्रभो S सहदेव (M1 2 °वे) च तुष्टवान् — After 31, B1 Dn D4 11.12 ins

257* धनं ददौ बहुविधं विराटः पुरुषर्षभः ।,

B3 ins

258* तथैव प्रददौ वित्तमनेकं मत्स्यराट् स्वयम् ।,

D2.3 ins

259* धनं प्रादात्सुबहुलं तस्य तुष्टः स पार्थिवः ।,

D7 9 ins

260* गावः प्रसूता वत्सैश्च विराटो विस्मितोऽभवत् ।,

and, finally, S ins

261* तस्मिन्काले ददौ तस्मै धनं प्रीतो नृपो बहु ।

[M1.2 ह्यदात्तत्र, M3 5 (sup. lin.) प्रदात्तस्य, M4 ददात्तस्मै, M5 ददौ तस्य (for ददौ तस्मै) G1.3 °ले नृप

00 3.44 5.61 विनीतान्वृपभान्दृष्ट्वा सहदेवस्य चाभिभो ॥ ३१
एवं ते न्यवसंस्तत्र प्रच्छन्नाः पुरुपर्षभाः ।
कर्माणि तस्य कुर्वाणा विराटनृपतेस्तदा ॥ ३२

इति श्रीमहाभारते विराटपर्वणि द्वादशोऽध्यायः ॥ १२ ॥ समाप्तं वैराटपर्व ॥

१३

वैशंपायन उवाच ।
वसमानेषु पार्थेषु मत्स्यस्य नगरे तदा ।
महारथेषु छन्नेषु मासा दश समत्ययुः ॥ १
याज्ञसेनी सुदेष्णां तु शुश्रूषन्ती विशां पते ।
अवसत्परिचारार्हा सुदुःखं जनमेजय ॥ २
तथा चरन्तीं पाञ्चालीं सुदेष्णाया निवेशने ।
सेनापतिर्विराटस्य ददर्श जलजाननाम् ॥ ३
तां दृष्ट्वा देवगर्भाभां चरन्तीं देवतामिव ।
कीचकः कामयामास कामबाणप्रपीडितः ॥ ४
स तु कामाग्निसंतप्तः सुदेष्णामभिगम्य वै ।
प्रहसन्निव सेनानीरिदं वचनमब्रवीत् ॥ ५
नेयं पुरा जातु मयेह दृष्टा

प्रादात्तस्य प्रीतो धन वहु]
— B1 Dn D4 11 12 ins after 257* B2 ins after 258* B3-5 D2 5 6 10 ins after 31 D8 8 ins after 259* D7 9 ins after 260*

262* द्रौपदी प्रेक्ष्य तान्सर्वान्क्लिश्यमानान्महारथान् ।
नातिप्रीतमना राजन्नि श्वासपरमाभवत् ।

[(L 2) Dn1 D2 °प्रीति°, D4 8 °प्रीतिमती B2 D5 भूत्वा (for राजन्)]

32 ^{b}) D6 कुरुनदना (for पुरुप°) — ^{c}) S (except T2 M1.2) तानि (for तस्य) D1-3 कुर्वंति (for कुर्वाणा) — ^{d}) T1 G1 °टस्य पतेः

Colophon — *Adhy name* B1.3 ब्रह्मणो महोत्सव, B2 Dn D6.11 12 जीमूतवध, B4 जीमूतमल्लयुद्ध वध, B5 D4 5 8 10 M4 मल्लयुद्ध, D1 2 मल्लविजय, D3 मल्लयुद्धे विजय, D6 मल्लयुद्धे जीमूतवध, D7 वध, G1 मल्लयुद्धकथन, M1-3 भीममल्लयुद्ध — *Adhy no* (figures, words or both) Ś1 K B4 D6(*sup lin*) 9 10 12, D5 13, S 14. — *S'lol a no* D1 39, G3 53

13

1 ^{a}) D1-3 एव वसत्सु, D7 9 वसत्सु तत्र, Cn वसमानेषु (as in text) — ^{b}) Ś1 D6 विराट, S (except G1) मात्स्यस्य, Ca मत्स्यस्य (as in text) — ^{d}) D6 transp मासा and दश Ś1 B2 Dn समाययु°, K B1 3-5 D समभ्य(D7 9 तदा य)यु (for समत्ययु)

2 ^{b}) Ś1 नराधिप, B5 मनस्विनी, S शुचिस्मिता (for विशां पते) — After 2^{ab}, D6 ins 263* — ^{c}) Dn2 D11 12 आवसत् Dn1 D1 7-9 परिचर्यार्हा, Dn2 D11.12 °चारार्थं (for °चारार्हा) — After 2, K2 D9 ins line 2 of 263*, which is followed by 264*

3 ^{a}) N (except Ś1 D2 4) चरती (B1 3 वसती, D7 9 वसतीं) पांचाली (D7 9 °लीं) — B Dn D3 5 10-12 G2 ins after 3^{ab} D6, after 2^{ab} K2 D9 (both om line 1), after 2

263* ता देवीं तोपयामास तथा चान्त पुरस्त्रिय ।
तस्मिन्वर्षे गतप्राये कीचकस्तु महाबल ।

[(L 1) B4 D5 10-12 G2 चात पुरे स्त्रिय — (L 2) K2 D3.6 सूतनदन, B2 4 D10 सूतसत्तम, B3 D5 शूरसमत°, D9 तदनतर (for स्तु महाबला) Ca cites line 2 — After line 2, B2 *repeats* 3^{ab}]

K2 D9 cont

264* सेनापतिर्द्वारदेश जित्वा सग्रामसमागत ।

— ^{d}) G3 ददृशे (for ददर्श) B1.3-5 Dn D5-7 9 11 12 द्रुपदात्मजा, S जलजेक्षणां (for °जाननाम्) B2 द्रुपदस्य निवेशने — After 3, T2 G2 ins

265* सारमेयो मन्त्रपूत वेदिपार्श्वगत हवि ।

4 ^{d}) D3 S कामवाणेन (T2 °वाणैर्नि)पीडित° — After 4, S (which om 5) reads 10-11 (with v l)

5 S om 5 — ^{a}) D1-3 स वै D5-7 9 कामाभिस° — ^{b}) D1-3 °तो गत, D8 °गम्य च

☞ For 6-9 and 12, S (which transp 10-11) subst. a passage given under v 1 12

6 For S cf v 1. 12 — ^{a}) K Dn D3.7 8. 10-12

राज्ञो विराटस्य निवेशने शुभा ।
रूपेण चोन्मादयतीव मां भृशं
गन्धेन जाता मदिरेव भामिनी ॥ ६
का देवरूपा हृदयंगमा शुभे
आचक्ष्व मे का च कुतश्च शोभना ।
चित्तं हि निर्मथ्य करोति मां वशे
न चान्यदत्रौषधमद्य मे मतम् ॥ ७
अहो तवेयं परिचारिका शुभा
प्रत्यग्ररूपा प्रतिभाति मामियम् ।
अयुक्तरूपं हि करोति कर्म ते
प्रशास्तु मां यच्च ममास्ति किंचन ॥ ८
प्रभूतनागाश्वरथं महाधनं
समृद्धियुक्तं बहुपानभोजनम् ।
मनोहरं काञ्चनचित्रभूषणं
गृहं महच्छोभयतामियं मम ॥ ९
ततः सुदेष्णामनुमन्त्र्य कीचक-
स्ततः समभ्येत्य नराधिपात्मजाम् ।
उवाच कृष्णामभिसान्त्वयंस्तदा
मृगेन्द्रकन्यामिव जम्बुको वने ॥ १०
इदं च रूपं प्रथमं च ते वयो
निरर्थकं केवलमद्य भामिनि ।
अधार्यमाणा स्रगिवोत्तमा यथा
न शोभसे सुन्दरि शोभना सती ॥ ११
त्यजामि दारान्मम ये पुरातना
भवन्तु दास्यस्तव चारुहासिनि ।
अहं च ते सुन्दरि दासवत्स्थितः C. 4 411 B 4 14 33 K. 4. 16. 33

---

transp पुरा and मया — cd) D1.3 जाल्या, Ca जाता (as in text) ॐ Cv नीलोत्पलसमो गन्धो यस्याः क्रोशात्प्रवायति [=1 155 43, 175 10]। गन्धे सुपक्का (cf. Ca जाता = पक्का)। जाल्या उत्कृष्टा। ॐ D8 च सुरेव (for मदिरेव) B3 4 Dn2 D5.6.10–12 Crp (Dev) भाविनी, D4 कामिनी, Ca r भामिनी (as in text)

7 D2 om. 7ab For S cf. v 1. 12 — a) B1.5 D6–7 9 10 शुभा (for शुभे) D1.3 का (D3 का) देवरूपा (D1 °पा) हृदयगमामिमा (D3 °गमानि) — b) Dn1 ह्याचक्ष्व N (except K D3, D2 om) कस्य (for का च) B Dn D5 11.12 कुतोत्र (B4 कुत सु), D8 कुलस्य Dn शोभने, D1.8 10 भामिनी — c) D1–8 इद (for चित्त) D5 7 9 वि, D3 च (for हि) D1–3 कामस्य (for निर्मथ्य) — d) N (except K D1–4.10) अस्ति (for अद्य)

8 For S cf. v 1. 12 — a) B1 D11.12 यतेय, D1 न मे स्याद् (for तवेय) — b) D4 प्रतिमेव, Ca.c r प्रतिभाति (as in text) D4 कावनी, D8 भामिनी (for मामियम्) — c) D4 अयुक्तमेतत्, D8 अयुक्तिरूप D1–4 तु (for हि) D1.3 न (for ते) D8 om. ते — d) D1.3 प्रशाम

9 For S cf. v 1. 12 — a) B D1–3 समाजन, Dn1 D10 महागजं, Dn2 D11.12 महाजन — b) Ś1 K मधुपान°. — c) D1–3 °चित्रमुत्तम, D4 °रत्नभूषण — d) D4 ता त्विय मम

10 S reads 10–11 after 4 — a) D1.2 गत°, D4.8 तथा (for तत°) Ś1 D1–4 8 अभिमन्त्र्य, D7 अनुमान्य T G M1–3 5 तथा च (G1 M1.5 तु) दृष्ट्वा ज्व(T3 च)लिता (M1–3 5 ज्वलतीं) च (G1 तु) कीचक°, M4 तथा ज्वलती मवलोक्य की°. — b) Ś1 तदा, K2 B1 2 4 D6 7 10 तथा (for तत°) G1.3 नृपाधिपा° — c) D5 अनुसान्त्व°, S परिसान्त्व° — After 10, B D (except D1.2 4 8) T3 ins a passage given in App I (No 12), which K2 ins after 4. 14. 1

11 Before 11, S ins कीचक S reads 10–11 after 4 — a) Dn D11.12 T2 हि, G1.3 M तु (for the first च) Ś1 अतुल, K ह्यतुल (for प्रथम) Dn D9 11.12 T2 नव, G1.3 तु ते (for च ते) — b) B3 केवलमेव B (except B1) D5 6 भाविनि, D7 9 भाति, Cv भामिनी — c) B (except B2) Dn D11.12 शुभा (for यथा) — d) D2 4 न शोभते Ś1 शोभती सती

12 For S see below — a) B2 त्यजानि D1.3 दारा D2 या; D4 यान् (for ये) D4 8 9 पुरातनान् D2m समयस्तवातिके — b) K1 भवति B1.3 D2m तव ते (D2m सतत) भजस्व मा — Ś1 K1 D1 om. 12cd, D2 reads it in marg — cd) K3 सर्वत स्थित°, D4 8 दास्यमास्थित° (for दास°) B2 D6 सदा भविष्यामि वशो वरानने (D6 वशस्तवानघे) D8 अह तवादेशकरो हि किंकरः स्थाने भव त्व मम मदन गृहे — After 12, D9 ins

266* त्वदीयसौन्दर्यगुणाकृत मनो

सदा भविष्ये वशगो वरानने ॥ १२
द्रौपद्युवाच ।
अप्रार्थनीयामिह मां सूतपुत्राभिमन्यसे ।
विहीनवर्णां सैरन्ध्रीं बीभत्सां केशकारिकाम् ॥ १३
परदारास्मि भद्रं ते न युक्तं त्वयि सांप्रतम् ।
दयिताः प्राणिनां दारा धर्मं समनुचिन्तय ॥ १४

निरर्थकं सुन्दरि जन्म यत्तव ।

☞ For 6–9 and 12, S subst the foll passage (reading 10–11 after 4)

267*
(6a) न त्वं पुरा जातु मयेह दृष्टा
(6b) राज्ञो विराटस्य निवेशने शुभे ।
(6c) रूपेण मे नन्दयसे मनस्त्वं
(7b) सुगात्रि कस्यासि कुतोऽसि का चा ।
(12c) दासस्तवाहं पृथुताम्रलोचने
(12d) वशानुगो वारणखेलगामिनि ।
कन्दर्पवेगाभिहतोऽस्म्यनिन्दिते
खगो वसन्तेष्विव पुष्पमूर्छित ।
त्वमेवमाचारपरीतदर्शना
(8a) नान्या स्त्रियं संपरिचर्तुमर्हसि ।
किं राजवेश्मन्यसितायतेक्षणे
करोषि केशान्स्वयमेव भामिनि ।
अन्या हि नार्यस्तव कर्म कुर्यु
प्रतीतरूपास्तव चारुनेत्रे ।
(11c) अधार्यमाणेव जनेन मञ्जरी
सुगात्रि किं जीर्यसि चारुहासिनि ।
(12a) त्यजामि दारान्मम ये पुरातना-
(12cd) न्भवामि दासश्च वशानुगश्च ते ।
सुगात्रि मह्यं सुकृतेन ते शपे
यथा मम त्वं हृदये प्रतिष्ठिता ।
ममानुरूपा त्वमनिन्द्यलोचने
स्वयं तथात्मानमिहानुचिन्तय ।
प्रत्यक्षमेतत्तव चारुदर्शने
यथा वयस्तुल्यवपुर्हि चावयो ।
(9a) प्रभूतरत्नोपहितं सुभाजनं
(9d) परैर्हि चाधेयं ममोत्तमं गृहम् ।
प्रासादमालाप्रविशालतोरणं
कुबेरपर्जन्यनिवेशनोपमम् ।
यदस्ति तत्रावसथे मदर्पणं
वसुप्रभावोपगतं ममान्तिके ।
ददामि तत्सर्वमधीरलोचने
त्वमस्य सर्वस्य सुगात्रि भाजनम् ।

[(L. 7) M कदर्पयाणाभि° — (L. 9) T G1 3 M2 त्वमेव मे चारुपरीतदर्शना (G1 °लोचने, M2 °दर्शने), M1 3 त्वमेवमाचारवती सुदर्शना — (L. 10) G2 नान्यं स्त्रियं; M1 2 नार्यस्त्रिय, M3 नान्या स्त्रिय — (L. 15) M (except M4) °र्यमाणा विजनेन म°. — (L. 16) G1 3 जीयसि; G2 जीर्यसि (for जीर्यसि) — (L. 19) T2 G2 मे (for ते) — (L. 22) M1 3 4 तदा, M2 त्व, M3 तय (for तथा) — (L. 25) M °रत्नावसथ G1 3 सुशोभन (for सुभा°) — (L. 26) T2 G2 M4 परे (for परैर्) — After line 28, M1 ins

268* प्रभूतशय्यासनपानभोजनं
प्रविश्य तत्रैव सुखी चिरं वस ।

— (L. 30) G1 3 वसुप्रतापोपगत M4 मदन्तिके]

S cont. with a passage given in App I (No 13)

13 B1 3 Dn2 D1 5 7 9 11 12 सैरध्री (for द्रौपदी) — a) D1 3 त्वं प्रार्थनीयाम् B3 D5 10 मां त्वं हि (D10 चे), D4 सुभगां; S कामार्तं (for इह मां) — b) Ca अतिमन्यसे, Co.v as in text — cd) K1 B1 Dn2 D2 6–9 निहीन°; Dn1 D4 8 10 न हीन°; S चतुर्थं°, Ca विहीन° (as in text) B1 D6 सैरिंध्रीं S विहीनां (for बीभत्सां) Dn D1 केशकारिणीं D1 3 विहीनवर्णा सैरध्री बीभत्सा केशकारिता — After 13, S ins

269* एतेनैव च वित्तेन यशेन च मनोरमा ।
शक्या चान्या त्वया प्राप्तुं स्वजातिकुलवर्धिनी ।
स्वेषु दारेषु मेधावी कुरुते यत्नमुत्तमम् ।
स्वदारनिरतो ह्याशु नरो भद्राणि पश्यति ।
परदाररतो मर्त्यो न च भद्राणि पश्यति ।
न चाधर्मेण लिप्येत न चाकीर्तिमवाप्नुयात् ।
स्वदारेऽभिरतिर्धर्मो मृतस्यापि न संशयः ।
स्वजातिदारा मर्त्यस्य इह लोके परत्र च ।
प्रेतकार्याणि कुर्वन्ति निवापैस्तर्पयन्ति च ।
तदक्षय्यं च धर्म्यं च स्वर्ग्यमाहुर्मनीषिणः ।
स्वजातिदारे ये पुत्रा जायन्ते कुलपूजिताः ।
ते क्षेत्रजाश्च पुत्राश्च श्रूयन्ते कुलवर्धनाः ।
तस्मात्स्वदारनिरता भवन्ति पुरुषाः शुभाः ।

[(L. 2) T2 G2 अन्या शक्या — M om line 5 — (L. 6) T2 G2 च धर्मेण and च कीर्तिम् — (L. 8) T2 G2 मर्त्येषु — (L. 10) T2 G2 धर्मं च G2 स्वर्गम्]

प्रकाशते कौरववंशजस्य वा ।
नापण्डितेयं तव दृश्यते तनु-
र्भवेह राज्ये मम मन्त्रधर्मभृत् ।
प्रशाधि मत्स्यान्सह राजकानिमा-
न्बृहस्पतिः शक्रयुतानिवामरान् ।
बलं च मे रक्ष सुवेष सर्वशो
गृहाण खड्गं प्रतिरूपमात्मनः ।
अनीककर्णाग्रधरो बलस्य मे
प्रभुर्भवानस्तु गृहाण कार्मुकम् ।
विराटराज्ञाभिहितः कुरूत्तमः
प्रशस्य राजानमभिप्रणम्य च ।
उवाच मत्स्यप्रवरं महामतिः
शृणुष्व राजन्मम वाक्यमुत्तमम् ।
बालो ह्यहं जातिविशेषदूषितः
कुतोऽद्य मे नीतिषु युक्तमन्त्रिता ।
स्वकर्मतुष्टाश्च वयं नराधिप
प्रशाधि मां गाः परिरक्षणेऽनघ ।

9

After 4 10 4, S ins.:

विराटः ।
गजेन्द्रलीलो मृगराजगामी
वृषेक्षणो देवसुतोग्रतेजाः ।
पीनांसबाहुः कनकावदातः
कोऽयं नरो मे नगरं प्रविष्टः ।
किमेष देवेन्द्रसुतः किमेष
ब्रह्मात्मजो वा किमयं स्वयंभूः ।

8

(L. 1) M_{1} $_{8}$ ह्ये (for वै) — (L. 6) G समीक्षत — (L. 12) G_{3} पाशानि, $M_{1.4}$ (*sup. lin.* as in text) $_{8}$ मौञ्जींश्च — (L. 13) T M मुर्मध्नां — (L. 16) M (except M_{4}) मा (for गा) — (L. 17) G_{3} M मयाभिगुप्ता — (L. 18) G प्रसन्न° (for प्रनष्ट°) — (L. 40) T_{1} °ष्व वाक्यं मम राजसत्तम — (L. 42) T_{1} G_{3} M_{4} °मग्रता. — (L. 43) T स्वकर्मयुक्ताश्च — (L. 44) M_{1-3} मा (for मां) T_{1} G_{2} M_{4} गो- (for गा.) T_{1} °रक्षणेन वै; T_{2} G_{1} $M_{3.4}$ (*sup. lin.*) प्रतिरक्षणेन च, $M_{1.2.3}$ °रक्षणे तव

उमासुतो वैश्रवणात्मजो वा
प्रैश्वर्यमासीदिति मे प्रतर्क. ।
वैशंपायन ।
सभामतिक्रम्य च वासवोपमो
निरीक्ष्यमाणो बहुभि समागतै ।
स तत्र राजानमभिप्रहाब्रवी-
द्बृहन्नलाहं नरदेव नर्तना ।
वेणीं प्रकुर्यां रुचिरे च कुण्डले
प्रथे स्रज प्रावरणानि सहरे ।
स्नानं रचेयं विसृजे च दर्पण
विशेषकेष्वेव च कौशल मम ।
क्रीडेषु बालेषु जलेषु नर्तने
शिक्षाप्रदानेषु च योग्यता मम ।
करोमि वेणीषु च पुष्पपूरका-
श्च मे स्त्रिय कर्मणि कौशलाधिका ।
तमब्रवीत्पार्थमुदीक्ष्य विस्मितो
विराटराजोपसृत महायशा ।

10

After 4 12 16ab, S (G1 om. lines 1-6) ins

भवाप्युसाश्च भीताश्च मल्लाश्चान्ये विचेतस ।
न्यसुस्त्वमपरे चैव वान्छन्तीव प्रविह्वला ।
गा प्रवेष्टुमिवेच्छन्ति स गन्तुमिव चोत्थिता. ।
त्रस्ता शान्ता विषण्णाङ्गा निःशब्दा विह्वलेक्षणा ।
विराटराजमल्लास्ते भग्नचित्ता हतप्रभा ।
मल्लेन्द्रनिहता सर्वे न किंचिद्व्यवदन्ति ते ।
मल्ल उद्वीक्ष्य तान्मल्लास्तान्वाक्यमुवाच ह ।
आगतं मल्लराज मा कृत्स्ने पृथिवीमण्डले ।
सिंहव्याघ्रगजै सार्धं क्रीडन्त विद्धि भूपते ।
मल्लेन्द्रस्य वच श्रुत्वा बलदर्पसमन्वितम् ।
विराटो वीक्ष्य तान्मल्लास्तान्वाक्यमुवाच ह ।
अनेन सह मल्लेन को योद्धुं शक्तिमान्नर ।
ततो युधिष्ठिरो ऽवादीच्छ्रुत्वा मत्स्यपतेर्वच ।
अस्ति मल्लो महाराज मया दृष्टो युधिष्ठिरे ।
अनेन सह मल्लेन योद्धुं शक्नोति भूपते ।
योऽसौ मल्लो मया दृष्ट पूर्वं यौधिष्ठिरे पुरे ।
सोऽय मल्लो वसत्येव राजस्तव महानसे ।
युधिष्ठिरवच श्रुत्वा व्यक्तमाहेति पार्थिव ।
सोऽप्यथाहूयतां क्षिप्रं योद्धुं मल्लेन संमदि ।
भीमसेनो विराटेन आहूतश्चोदितस्तदा ।
योद्धुं ततोऽब्रवीद्वाक्यं योद्धुं शक्नोमि भूपते ।
नरेन्द्र ते प्रभावेन श्रिया शक्त्या च शासनात् ।
अनेन सह मल्लेन योद्धुं राजेन्द्र शक्नुयाम् ।
युधिष्ठिरकृतं ज्ञात्वा श्रिया तव विशां पते ।
महादेवस्य भक्त्या च तं मल्लं पातयाम्यहम् ।
चोदितो भीमसेनस्तु मल्लमाहूय मण्डले ।

11

N ins after 4 12 20 T3, after line 2 of 253*:

ततस्तौ नरशार्दूलौ बाहुयुद्धे समीयतु. ।
वीरौ परमसंहृष्टावन्योन्यजयकाङ्क्षिणौ ।
आसीत्सुभीम संपातो वज्रपर्वतयोरिव ।
उभौ परमसंहृष्टौ बलेनातिबलावुभौ ।
अन्योन्यस्यान्तरं प्रेप्सू परस्परजयैषिणौ ।
उभौ परमसंहृष्टौ मत्ताविव महागजौ ।
कृतप्रतिकृतैश्चित्रैर्बाहुभिश्च सुसंकटै ।
संनिपातावधूतैश्च प्रमाथोन्मथनैस्तथा ।
क्षेपणैर्मुष्टिभिश्चैव वराहोद्धूतनिस्वनै ।
तलैर्वज्रनिपातैश्च प्रसृष्टाभिस्तथैव च ।
शलाकानखपातैश्च पादोद्धूतैश्च दारुणै ।
जानुभिश्चाश्मनिर्घोषै शिरोभिश्चावघट्टितै ।
तद्युद्धमभवद्घोरमशस्त्रं बाहुतेजसा ।

9

(L 1) G3 ऽगजेन्द्रतुल्यो — (L. 2) Some MSS °तोऽय° — (L. 7) G M1 उमासुगे, M2 ऽ कुमारानो (for उमा°) — After line 20, T1 ins

इत्यर्जुनस्य नरदेवमोजसा
विज्ञाप्य तस्थौ विधिनात्मन क्रियाम् ।

10

(L. 9) T2 G2 °मृगे, G1 M5 °गणे (for °गजे) — After line 12, T1 ins

इत्युक्तास्ते विराटेन सर्वे मल्ला विशां पते ।
तूष्णींभासस्ततो राजा क्रोधाविष्ट उवाच स ।
ग्रामांश्च वेतनान्येषां मल्लानां हारयाम्यहम् ।

— (L. 21) M1-3 योद्धुकामो (for योद्धुं ततो) — (L. 24) G2 °कृत कृत्वा, M °कृतवात् — (L 26) M (except M4) त (for तु) — After line 26, T G2 ins

योद्धुं व्यवसितो वीरो रेणुं संमृज्य हस्तयो ।

11

(L. 1) B2.5 Dn2 D1-3.9-12 T2 °युद्ध — (L. 2) Om in D1-3. D8 बलेनातिबलावुभौ (for the posterior half). — After line 2, Ś1 K ins

तद्युद्धमभवद्घोरं तयोस्तत्र समागमे ।

— (L. 3) Om. in D1-3. Dn2 D11.12 T2 भीमश्च (for सुभीम) — (L 4) Om. in K2 D5.7 D1.2 वीरौ (for उभौ) — (L 5) Om in K2 D5.7 Ś1 Dn1 D1.2 D4

हारोत्कारयोग्यौ तु स्तनौ चोनौ सुशोभनौ ।
सुजातौ सहितौ लक्ष्म्या पीनौ वृत्तौ निरन्तरौ ।
कुड्मलाम्बुरुहाकारौ तव सुभ्रु पयोधरौ ।
कामप्रतोदाविव मां तुदतश्चारुहासिनि ।
वलीविभङ्गचतुरं स्तनभारविनामितम् ।
कराग्रसंमितं मध्यं तवेदं तनुमध्यमे ।
दृष्ट्वैव चारु जघनं सरित्पुलिनसंनिभम् ।
कामव्याधिरसाध्यो मामप्याक्रामति भामिनि ।
जज्वाल चाग्निमदनो दावाग्निरिव निर्दयः ।
त्वत्संगमाभिसंकल्पविवृद्धो मे दहत्ययम् ।
आत्मप्रदानवर्षेण संगमाम्भोधरेण च ।
शमयस्व वरारोहे ज्वलन्तं मन्मथानलम् ।
मच्चित्तोन्मादनकरा मन्मथस्य शरोत्कराः ।
त्वत्संगमाशानिशितास्तीव्राः शशिनिभानने ।
मह्यं विदार्य हृदयमिदं निर्दयवेगिताः ।
प्रविष्टा ह्यसितापाङ्गि प्रचण्डाश्चण्डदारुणाः ।
अत्युन्मादसमारम्भाः प्रीत्युन्मादकरा मम ।
आत्मप्रदानसंभोगैर्मामुद्धर्तुमिहार्हसि ।
चित्रमाल्याम्बरधरा सर्वाभरणभूषिता ।
कामं प्रकामं सेव त्वं मया सह विलासिनि ।
नार्हसीहासुखं वस्तुं सुखार्हा सुखवर्जिता ।
प्राप्नुह्यनुत्तमं सौख्यं मत्तस्त्वं मत्तगामिनि ।
स्वादून्यमृतकल्पानि पेयानि विविधानि च ।
पिबमाना मनोज्ञानि रममाणा यथासुखम् ।
भोगोपचारान्विविधान्सौभाग्यं चाप्यनुत्तमम् ।
पानं पिब महाभागे भोगैश्चानुत्तमैः शुभैः ।

13

After 267* (cf. v 1. 4 13 12), S ins.:

देव प्रपद्ये शरणं वृषध्वज
त्रिलोचन दक्षमखप्रणाशनम् ।
हर भर्व स्थाणुमुमापतिं प्रभुं

K2 लक्ष्म्या चोनतमानुत, D7 लक्ष्म्या अनुत्तमाकृति — (L. 17) K3 B5 D3 °योन्नौ (D3 °योन्नौ) ते, B2–4 D5 °योर्वौ च (B4 °न्ने), D7 9 °योन्नाति, D10 °सुयोनौ K2 स्तनौ पीनोन्नतौ शुभे, B2.3 D3 उभौ चारुस्तनौ शुभौ, B4 समानौ स्तनौ शुभौ, B5 समावेतौ समानुभौ, D2 समावेतौ स्तनौ शुभे, D7 9 पीनोन्नत-शुभस्तनौ, D10 उभौ स्तनौ स्मौ शुभौ — (L. 18) B2 स्पृतौ (for सहितौ) K2 स्तनशुजातौ सहितौ, D5 सुभौ सुजातौ लक्ष्म्या च, D1.2 हीन्यौ सुजातौ सुवनौ Cs cites सुजातौ K2 स्थो-पेतौ, B2 पानावलि-, D7 9 सुपीनौ (for पीनौ वृत्तौ) Cc cites वृत्तौ — (L. 19) D10 कुड्मलाम्बुजिनाकारौ (cf. Cs) Cr पयोदगौ (=पयोदरौ?) — (L. 20) Om. in D7 K2 कामप्रतादावेतौ; D3 कामप्रवाददावेतौ Cc cites प्रतोदाविव K2 स्तनौ ते (for तुदत) — (L. 21) K2 D7 9 त्रिवलीभा°, D10 वलीविभा° Cc analyses वलीविभा° K2 आवर्ते नाभि मध्यं — (L. 24) B3m.4 क्रोशी मा, D7 9 असह्यो, Cc असाध्यो (as above) K2 B5 अथ, B3m.4 च (for माम्) K2 मन्येहमिति प्रार्थये, B2.4 वाधतेतीव भामिनि — (L. 25) B D5 6 10 ज्वालावानय मदनो, D3 जज्वाल वाय मदनो, D7 9 सतापयन्मां वन B3 मा स्पृहेत्, D5 7 9 निर्दहन् — (L. 26) Cr cites त्वत्सं B2.4.5 Dn1 D5 मा (for मे) B1.3 त्वत्संगमाशा(B3m °नि)तज्ज्वलितश्चामिदहन्नयं — (L. 28) B2.4 D7 9 शमन त्वं (for °यस्व) — (L. 29) K2 मदोत्करा, B2 D–7.9 शरोत्तमा — (L. 30) Dn D11.12 T2 त्वत्संग-मेन शमिता, D7 9 त्वत्सारुमनंनिरता Cr cites निशिता K2 शरा, B (except B5) D2.5 6.11 Cr पीना, D7 9 नष्टा (for तीव्रा) D7 9 शशिवराने — (L. 31) Om. in Dn D11.12 T2. D7 9 प्रवाविदार्य — (L. 32) B2 D2.6.7 9.10 च (for हि) D7 9 अनवद्यांगि (for असिता°) B2.4 D3 7 9.10 च तुरा गा — (L. 33) K2 त्वं प्रापय ममारभ B3 (m as above) रत्युन्मा°, B4 रत्युन्मादकरारमा, D6 प्रत्युन्माद-करारले, D7 9 मृत्युपायसमा° K2 प्रत्युत्साहकर, B2 3m Cr सान्त्वाल्यकरा°, B4 प्रत्युत्सादकरा°, D2.5 प्रीत्युत्सादकरा°, D6 प्रत्युन्मादकरा, D7 9 मृत्युन्माद° Cc cites कारा B2 Cr त्वं (for मम) — (L. 34) K2 B2–4 D2 6.10 °भोगाद् K2 D7 9 मां समुद्धर्तुमर्हसि, B2–4 D2.10 मामुद्धर्तुं समर्हसि, D6 मां समुद्धर्तुमर्हसि — (L. 35) K2 विचित्रपुष्पाभरणा, D7 दिव्यमाल्या°. D7 9 दिव्या° (for सर्वा°) — (L. 36) K2 मा दत्त्व, B3m D2.7 9 सेवस्व (for सेव त्वं) — (L. 37) K2 कर्तुं (for वस्तुं) D7 9 तथैवार्हा सुख वस्तु — (L. 38) Dn1 D11.12 T2 प्राप्नु हि, D10 प्राप्य च, Cn.r (commenting on line 41) प्राप्नुहि (as above) K2 प्राप्नुया उत्तम सौ° K2 मदगामिनि, B2–4 D6 गजगा°, B3m D5 (after corr.) 7 मत्तकाशिनि — (L. 39) K2 B (except B1) D5–7 9.10 पानानि (for पेयानि) — (L. 40) K2 पिब त्वं हि (for पिब°), and रमस्व (for रममाणा) — (L. 41) K2 भोगान्मत्तस्त्वं निपुणान् D7 9 मद्यान्विविं (for चाप्य°) — After line 41, K2 (which om. line 42) ins.

निर्यन्तु वरारोहे भूषदक्षिणमप्रदान् !,

repeating thereafter 4 14 1[ab] — (L. 42) B2 4 6 D3 10 Ca.c(?) r पाहि; Crp (Cat.) पिब (as above) D7 10 मानयस्व वरारोहे B3–5 D3.5–7 9 10 om. च

13

(L. 3) T1 G1 शिव, G2 M3 विभु (for प्रभु) — (L. 10) G2 व्याल प्रियत्व, M1.4.5 व्याल प्रिय° M मेदिनी (for भामिनि) — (L. 12) G2 M1.5 °असरोमि — (L. 17) M

गन्धर्वाः किल पञ्चैना रक्षन्ति रमयन्ति च ।
एवमेषा समाचष्ट तदा प्रथमसंगमे ।
तथैव गजनासोरूः सत्यमाह ममान्तिके ।
ते हि क्रुद्धा महात्मानो नाशयेयुर्हि जीवितम् ।
राजा चैव समीक्ष्यैनां समोहं गतवानिह ।
मया च सत्यवचनैरनुनीतो महीपतिः ।
सोऽप्येनामनिदां दृष्ट्वा मनसैवाभ्यनन्दत ।
भयाद्गन्धर्वमुख्यानां जीवितस्योपघातिनाम् ।
मनसापि ततस्त्वेनां न चिन्तयति पार्थिव ।
ते हि क्रुद्धा महात्मानो गरुडानिलतेजसः ।
दहेयुरपि लोकांश्च युगान्तेष्विव भास्कराः ।
सैरन्ध्र्या ह्येवदाख्यातं मम तेषां महद्बलम् ।
तव चाहमिदं गुह्यं स्नेहादाख्यामि बन्धुवत् ।
मा गमिष्यसि वै कृच्छ्रां गतिं परमदुर्गमाम् ।
बलिनस्ते रुत्र कुर्युः कुलस्य च जनस्य च ।
तस्मात्त्वास्यां मनः कर्तुं यदि प्राणाः प्रियास्तव ।
मा चिन्तयेथा मा गास्त्वं मप्रियं च यदीच्छसि ।
एवमुक्तस्तु दुष्टात्मा भगिनीं कीचकोऽब्रवीत् ।
गन्धर्वाणां शतं वापि सहस्रमयुतानि वा ।
अहमेको हनिष्यामि गन्धर्वान्पञ्च किं पुनः ।
न च त्वमभिजानीषे स्त्रीणां गुह्यमनुत्तमम् ।
पुत्रं वा किल पौत्रं वा भ्रातरं वा मनस्विनी ।
रहसीह नरं दृष्ट्वा नानागन्धविभूषितम् ।
योनिरुत्क्लिद्यते स्त्रीणामसतीनां मया श्रुतम् ।
सा त्वं ध्रुवं ब्रूहि चैनां मम चेच्छसि जीवितम् ।
एवमुक्ता सुदेष्णा तु शोकेनाभिप्रपीडिता ।
अहो दुःखमहो कृच्छ्रमहो पापमिति स्म ह ।
प्रारुदन्मृगशावाक्षी विपाकं तस्य वीक्ष्य सा ।
पातालेषु पतत्येष विलपन्वडवामुखे ।
त्वत्कृते विनशिष्यन्ति भ्रातरः सुहृदश्च मे ।
किं तु शक्यं मया कर्तुं यत्त्वमेवमभिप्लुतः ।
न च श्रेयोऽभिजानीषे काममेवानुवर्तसे ।
ध्रुवं गतायुस्त्वं पाप यदेव काममोहितः ।
अकर्तव्ये हि मां पापे नियुनङ्क्षि नराधम ।
अपि चैतत्पुरा प्रोक्तं निपुणैर्मनुजोत्तमैः ।
एकस्तु कुरुते पापं स्वजातिस्तेन हन्यते ।
गतस्त्वं धर्मराजस्य विषयं नात्र संशयः ।
अनूपक्रमिमं सर्वं स्वजनं घातयिष्यसि ।
एतत्तु मे दुःखतरं येनाहं भ्रातृसौहृदात् ।
विदितार्था करिष्यामि तुष्टो भव कुलक्षयात् ।
गच्छ शीघ्रमितस्त्वं हि स्वमेव भवनं शुभम् ।

16

After 4. 15. 14, S ins.

द्रौपदी ।
प्रजारक्षणशीलानां राज्ञां ह्यमिततेजसाम् ।
कार्यानुपालनान्नित्यं धर्मे सत्ये च तिष्ठताम् ।
स्वप्रजायां प्रजायां च विशेषं नाधिगच्छताम् ।
प्रियेष्वपि च द्वेष्येषु समत्वं ये समाश्रिताः ।
विवादेषु प्रवृत्तेषु समकार्यानुदर्शिनाः ।
राज्ञा धर्मासनस्थेन जितौ लोकावुभावपि ।
राजन्धर्मासनस्थोऽसि रक्ष मां त्वमनागसीम् ।
अहं त्वनपराध्यन्ती कीचकेन दुरात्मना ।
पश्यतस्ते महाराज हता पादेन दासिवत् ।
त्वत्समक्षं नरश्रेष्ठ निष्पिष्टा वसुधातले ।
अनागसीं कृपार्हां मां स्त्रियं त्वं परिपालय ।
रक्ष मां कीचकाज्जीवां धर्मं रक्ष नरेश्वर ।
मत्स्याधिप प्रजा रक्ष पिता पुत्रानिवौरसान् ।
यस्त्वधर्मेण कार्याणि मोहाद्वा कुरुते नृपः ।
अचिरात्तं दुरात्मानं वशे कुर्वन्ति शत्रवः ।
मत्स्यानां कुलजस्त्वं हि तेषां सत्यं परायणम् ।
स्व किलैवंविधो जातः कुले धर्मपरायणे ।

समाचष्ट, G1.3 तथाचष्ट. — (L. 12) M (except M4) महानति (for मही°). — (L. 17) T1 G भास्कर° — (L. 18) T2 G3 M (except M4) बलावल (for महद्बलम्) — (L. 20) T G2 दुस्त्वा, M5 कष्टा (for कृच्छ्रां) — (L. 21) T1 M (except M5) रुत्रां, T2 G2 वल (for रुत्र) T2 G2 दुर्वंश्य (for कुलस्य च) — M om. lines 22–23 — (L. 22) T om. न — (L. 25) M1–3 °युत तथा — (L. 28) T1 भ्रातरं चैव मातुलं, M °रं वा यश(M4 5 मन)स्विन — (L. 29) M ना(M1.3 स्त्रा)नाग° — (L. 30) T1 G1.3 °रुत्क्लि-द्यते, T2 °रुत्क्लिद्यते, G2 °त्क्लवते — After line 30, T1 G2 ins

मां निरीक्ष्यानुलिप्तांग सर्वाभरणभूषितम् ।
बहुमेष्यति सैरन्ध्री मन्मथेनाभिपीडिता ।

— (L. 31) T दृष्टा, G1 द्रष्टु, G2.3 धृष्ट, M4 श्रुत (for ध्रुवं) G3 M1–3 5 वदस्व, M4 ब्रवस्व (for ब्रूहि च) T2 G1 मम चेज्जीवित प्रिय, M4 जीवित मां यदीच्छसि, M5 मम चेदिच्छसि प्रिय — (L. 33) M ब्रुवन् (for स्म ह) — (L. 34) M transp तस्य and वीक्ष्य — (L. 35) T भवतो (for विलपन्) — (L. 42) T2 G M5 तु (for स्व-) — (L. 44) T G2 अनूपिनम्, G1.3 अनुपक्रम्

16

(L. 1) M °शीलेन T2 G2 राज्ञामनित°, M राज्ञा ह्यमित-तेजसा — (L. 2) M तिष्ठता — (L. 3) M °गच्छता — (L. 4) M च° (for ये), and °श्रित (for °श्रिता°) — (L. 5) T1 G1 सम, T2 सम्यक् (for सम-) — (L. 10) M नृपश्रेष्ठ — (L. 14) T2 G1 M (except M4) नृप

अतस्त्वाहमभिक्रन्दे शरणार्थं नराधिप ।
त्राहि मामद्य राजेन्द्र कीचकात्पापपूरुषात् ।
अनाथामिति मा ज्ञात्वा कीचकः पुरुषाधमः ।
प्रहरत्येव नीचात्मा न च धर्ममवेक्षते ।
अकार्याणामनारम्भात्कार्याणामनुपालनात् ।
प्रजासु ये सुवृत्तास्ते स्वर्गमायान्ति भूमिपाः ।
कार्याकार्यविशेषज्ञाः कामकारेण पार्थिवाः ।
प्रजासु किल्बिषं कृत्वा नरकं यान्त्यधोमुखाः ।
नैव यज्ञैर्न वा दानैर्न गुरोरुपसेवनात् ।
प्राप्नुवन्ति तथा धर्मं यथा कार्यानुपालनात् ।
अपि चेदं पुरा ब्रह्मा प्रोवाचेन्द्राय पृच्छते ।
द्वन्द्वं कार्यमकार्यं च लोकेष्वासीत्परं यथा ।
धर्माधर्मौ पुनर्द्वन्द्वं विनियुक्तमथापि वा ।
क्रियायामक्रियायां च प्रापणे पुण्यपापयोः ।
प्रजायां सृज्यमानायां पुरा ह्येतदुदाहृतम् ।
एतद्वो मानुषाः सम्यक्कार्यं द्वन्द्वत्रयं भुवि ।
अस्मिन्सुनीते दुर्नीते लभते कर्मजं फलम् ।
कल्याणकारी कल्याणं पापकारी तु पापकम् ।
तेन गच्छन्ति संसर्गं स्वर्गाय नरकाय वा ।
एवमुक्त्वा परं वाक्यं विससर्ज शतक्रतुम् ।
शक्रोऽप्यापृच्छ्य ब्रह्माणं देवराज्यमपालयत् ।
यथोक्तं देवदेवेन ब्रह्मणा परमेष्ठिना ।
तथा त्वमपि राजेन्द्र कार्याकार्ये स्थिरो भव ।

Colophon

वैशंपायनः ।

एवं विलपमानायां पाञ्चाल्यां मत्स्यपुंगवः ।
अशक्तः कीचकं तत्र शासितुं बलदर्पितम् ।
विराटराजः सूतं तु सान्त्वेनैव न्यवारयत् ।
कीचकं मत्स्यराजेन कृतागसमनिन्दिता ।
नापराधानुरूपेण दण्डेन प्रतिपादितम् ।
पाञ्चालराजस्य सुता दृष्ट्वा सुरसुतोपमा ।
धर्मज्ञा व्यवहाराणां कीचकं कृतकिल्बिषम् ।
पुनः प्रोवाच राजानं स्मरन्ती धर्ममुत्तमम् ।
संप्रेक्ष्य च वरारोहा सर्वांस्तत्र सभासदः ।
विराटं चाह पाञ्चाली दुःखेनाविष्टचेतना ।

Then follow 4 15 24-27.

17

S ins after 4 15 33 (T_1, which hapl. om st. 33 and lines 1-8 of the foll passage, ins after 32).

श्रूयतां ते सुकेशान्ते मोक्षधर्माश्रया कथा ।
यथा धर्मः कुलस्त्रीणां दृष्टो धर्मानुरोधनात् ।
नास्ति यज्ञः स्त्रियः कश्चिन्न श्राद्धं नाप्युपोषणम् ।
या तु भर्तरि शुश्रूषा सा स्वर्गायाभिजायते ।
पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
पुत्रस्तु स्थविरीभावे न स्त्री स्वातन्त्र्यमर्हति ।
अनुरुध्यमाना भर्तारं दृश्यन्ते वीरपत्नयः ।
शुश्रूषया क्लिश्यमानाः पतिलोकं जयन्त्युत ।
भर्तॄन्प्रति तथा पत्न्यो न कुप्यन्ति कदाचन ।
बहुभिश्च परिक्लेशैरविज्ञाताश्च शत्रुभिः ।
अनन्यभावशुश्रूषाः पतिलोकं जयन्त्युत ।
न क्रोधकालं नियतं पश्यन्ति पतयस्तव ।
न क्रुद्धान्प्रतियायाद्धि पतींस्ते वृत्रहा अपि ।
तेन त्वां नाभिधावन्ति गन्धर्वाः कामरूपिणः ।
यदि ते समयः कश्चित्कृतो ह्यायतलोचने ।
तं स्मरस्व क्षमाशीले क्षमा धर्मो ह्यनुत्तमः ।
क्षमा धर्मः क्षमा सत्यं क्षमा दानं क्षमा तपः ।
व्रतिनो द्वादशाहस्य चतुर्विंशतिपर्वणः ।
कश्चित्षष्टिशतारस्य मासोनस्याक्षमी भवेत् ।
वैशंपायनः ।
इत्येवमुक्ते तिष्ठन्तीं पुनरेवाह धर्मराट् ।

— (L 20) M_{1-3} मत्वा मां, $M_{4.5}$ मां मत्वा (for मां ज्ञात्वा) — (L. 23) $M_{1.5}$ स्यु, $M_{2.3.4}$ (*sup lin* as in text) तु (for ते) — (L 26) M तपोदानैर् (for न वा दानैर्) — (L 28) M एतत् (for इदं) — (L 31) $G_{1.3}$ क्रियाणामक्रियाणां च, M_{1-3} अक्रियायां क्रियायां च — (L 36) M निःसंग (for संसर्गं) — After line 36, T G ins

सुकृतं दुष्कृतं वापि कृत्वा मोहेन मानवः ।
पश्चात्तापेन तप्येत स्वबुद्ध्या मरणं गतः ।

— (L. 38) T_1 G देवान्पालयते प्रभुः, T_2 देवान्प्रभुरपालयत् — (L 40) $G_{1.3}$ यतो (for स्थिरो) — Colophon *Adhy no* 18 — (L. 43) M °नैवाभ्यवारयत् — (L 46) M transp. पाञ्चाल° सुता and दृष्ट्वा — (L 47) M °हारस्य — After line 49, T G_2 ins

राजानुवर्तनपरान्कीचकं च कृतागसम् ।

17

Lines 5-6 = Manu 9 3 — Lines 7-8 = (var) 4 15 32 — (L 7) Hypermetric! T_2 G_2 आराध्य° (for अनु°). — $G_{1.3}$ om line 8 — (L. 9) $M_{1.2}$ भीरु (M2 भर्तुर्) भर्तृभयात्पत्न्यो, M_{3-5} (corrupt) भर्तृभीरुभयात्पत्न्यो — (L 10) T_1 $M_{1.2.5}$ अवशा°, G_3 परिशा° $G_{1.2}$ वधुभि° (for शत्रुभिः) — (L 11) G_1 M_1 परलोक, $M_{2.4}$ पुण्यलोक $G_{1.3}$ M (except M_3) व्रजति (for जयन्ति) — (L. 18) T_1 $G_{1.3}$ त्रिदिनो, T_2 M_2 त्र्यशिनो

18

After 4. 15 41, S (M2-5 om lines 13-19) ins.:

भ्रातुः प्रयच्छ त्वरिता जीवश्राद्धं तमद्य वै ।
सुदृष्टं कुरु चैवैनं नासून्मन्ये धरिष्यति ।
तेषां हि मम भर्तॄणां पञ्चानां धर्मचारिणाम् ।
एको दुर्मर्षणोऽत्यर्थं बले चाप्रतिमो भुवि ।
निर्मनुष्यमिमं लोकं कुर्यात्क्रुद्धो निशामिमाम् ।
न च संक्रुध्यते तावद्गन्धर्वः कामरूपधृक् ।
नूनं ज्ञास्यति यावद्धि ममैतत्पादघातनम् ।
तत्क्षणात्कीचकं पापं सपुत्रभ्रातृबान्धवम् ।
विनशिष्यति दुष्टात्मा यथा दुष्कृतकर्मकृत् ।
अपि चैतत्पुरा प्रोक्तं निपुणैर्मनुजोत्तमैः ।
एकस्तु कुरुते पापं कालपाशवशं गतः ।
नीचो ह्यात्मापराधेन कुलं येन विनश्यति ।
सुदेष्णामेवमुक्त्वा तु सैरन्ध्री दुःखमोहिता ।
कीचकस्य वधार्थाय व्रतदीक्षामुपागमत् ।
अभ्यर्थिता च नारीभिर्मानिता च सुदेष्णया ।
न च स्नाति न चाश्नाति पांसून्न परिमार्जति ।
रुधिरक्लिन्नवसना बभूव मृदितेक्षणा ।
तां तथा शोकसंतप्तां दृष्ट्वा प्ररुरुदुः स्त्रियः ।
कीचकस्य वधं सर्वा मनोभिश्चाशशंसिरे ।

19

The foll. (addl.) adhy is ins after adhy 15 in S (except M2 2.5, M1 marg ins lines 1-3 here and the whole adhy after the end of this parvan)

जनमेजयः ।
अहो दुःखतरं प्राप्ता कीचकेन समाहता ।
पतिव्रता महाभागा द्रौपदी योषितां वरा ।
दुःशालां मानयन्ती या भर्तॄणां भगिनीं शुभाम् ।
नाशपत्किन्दुरात्मानं सा बलात्कारेण वाहिता ।
किमर्थमिह संप्राप्ता कीचकेन दुरात्मना ।
नाशपच्च महाभागा कृष्णा पादेन ताडिता ।
तेजोराशिरिव देवी धर्मज्ञा सत्यवादिनी ।
केशपक्षे परामृष्टा मर्षयिष्यत्यशक्तवत् ।
नैतत्कारणमल्पं हि श्रोतुकामोऽस्मि सत्तम ।
कृष्णायास्तु परिक्लेशान्मनो मे दूयते भृशम् ।
कस्य वंशे समुद्भूतः स च दुर्ललितो मुने ।
बलोन्मत्तः कथं चासीत्स्यालो मात्स्यस्य कीचकः ।
दृष्ट्वापि तां प्रियां भार्यां सूतपुत्रेण ताडिताम् ।
नैव चुक्षुभिरे वीराः किमकुर्वन्त तं प्रति ।
वैशंपायनः ।
त्वद्युक्तोऽयमनुप्रश्नः कुरूणां कीर्तिवर्धन ।
एतत्सर्वं यथा वक्ष्ये विस्तरेणेह पार्थिव ।
ब्राह्मण्यां क्षत्रियाज्जातः सूतो भवति पार्थिव ।
प्रातिलोम्येन जातानां स ह्येको द्विज एव तु ।
रथकारमितीमं हि क्रियायुक्तं द्विजन्मनाम् ।
क्षत्रियादवरो वैश्याद्विशिष्टमिति चक्षते ।
सह सूतेन संबन्धः कृतः पूर्वं नराधिपैः ।
तेन तु प्रातिलोम्येन राजशब्दो न लभ्यते ।
तेषां तु सूतविषयः सूतानां नामतः कृतः ।
उपजीव्य च यत्क्षत्रं लब्धः सूतेन यत्पुरा ।
सूतानामधिपो राजा केकयो नाम विश्रुतः ।
राजकन्यासमुद्भूतः सारथ्येऽनुपमोऽभवत् ।
पुत्रास्तस्य कुरुश्रेष्ठ मालव्यां जज्ञिरे तदा ।
कीचका इति विख्याताः शतं षट् चैव भारत ।
तेषामासीद्बलश्रेष्ठः कीचकः सर्वजित्प्रभो ।
अग्रजो बलसमत्तस्तेनासीत्सूतपञ्चवम् ।
मालव्या एव कौरव्य तत्र ह्यवरजाभवत् ।
तस्यां केकयराजस्तु सुदेष्णा दुहिताभवत् ।
तां विराटस्य मात्स्यस्य केकयः प्रददौ मुदा ।
सुरथायां मृतायां तु कौसल्यां श्वेतमातरि ।
श्वेते विनष्टे शङ्खे च गते मातुलवेश्मनि ।
सुदेष्णां महिषीं लब्ध्वा राजा तु समपाद्युदत् ।
उत्तरं चोत्तरां चैव विराटात्पृथिवीपते ।
सुदेष्णा सुषुवे देवी कैकेयी कुलवृद्धये ।
मातृष्वसृसुतां राजन्कीचकस्तामनिन्दिताम् ।
सदा परिचरन्प्रीत्या विराटे न्यवसत्सुखी ।

18

(L. 2) M (except M1) न म (for नाम्नः) — (L. 12) T G1.3 तेन (for येन) — (L. 17) T1 G1 °क्लिन्नवदना G1 °व मदिरेक्षणा, G2 °वामुदितै°, G3 °व नदितै°, M1 °व रुधिरोक्षिता — (L. 18) T2 प्रानन्दिता, G2 प्रानन्दुः, M1 प्ररुदिता — (L. 19) G1.3 °श्च शशंसिरे, G2 °श्चाशशंसिरे

19

After the prior half of line 2, G1.3 read the posterior half of line 6, then lines 7–8, 3–5 and the prior half of line 6, followed by the posterior half of line 2 — In G3 lines 7–8 are repeated. — (L. 9) Cf. 1 56 4[ab] G1.3 M1 कृतपूर्वो G1.3 निशां स्मृत, M1.4 नरेश्वरै° (for नरा°) — (L. 22) Om. in G1.3 M1.4 तथापि तैर्महीपालै(M4 °नैरन्यात्र) — (L. 24) Om. in G2 T2 G1.3 क्षेत्र, and राजन् (for लब्ध). — (L. 25) Om in G2 M1.4 कीचको (for केकयो). — (L. 28) Om in M1.4 — (L. 29) T G2 नपि (for आसीद्) G1 कुलश्रेष्ठ, G3 बल श्रेष्ठ, M4 बल श्रेष्ठ M1 तेषामतिबलो ज्येष्ठ — (L. 31) M1 द्वितीयाया तु मालव्यां (for

भ्रातरश्चास्य विक्रान्ता सर्वे च तमनुव्रता ।
विराटस्यैव सहृष्टा बल कोश च वर्धयन् ।
कालेया नाम दैतेया प्रायशो भुवि विश्रुता ।
जज्ञिरे कीचका राजन्याणो ज्येष्ठस्ततोऽभवत् ।
स हि सर्वास्त्रसपन्नो बलवान्भीमविक्रम ।
कीचको नष्टमर्यादो बभूव भयदो नृणाम् ।
त प्राप्य बलसमत्त विराट पृथिवीपति ।
जिगाय सर्वांश्च रिपून्यथेन्द्रो दानवान्पुरा ।
मेखलाश्च त्रिगर्तांश्च दशार्णांश्च कशेरुकान् ।
मालवान्यवनाश्चैव पुलिन्दान्काशिकोसलान् ।
अङ्गान्वङ्गान्कलिङ्गांश्च तङ्गणान्परतङ्गणान् ।
करदाश्च निषिद्धाश्च शिवान्मल्लिच्छिकास्तथा ।
अन्ये च बहव शूरा नानाजनपदेश्वरा ।
कीचकेन रणे भग्ना व्यद्रवन्त दिशो दश ।
तमेव वीर्यसपन्न नानायुतसम बले ।
विराटस्तत्र सेनायाश्चकार पतिमात्मन ।
विराटभ्रातरश्चैव दश दाशरथोपमा ।
ते चैनानन्ववर्तन्त कीचकान्बलवत्तरान् ।
एवविधबलो भीम कीचकास्ते च तद्विधा ।
राज्ञ स्याला महात्मानो विराटस्य हितैषिण ।
एतत्ते कथित सर्वं कीचकस्य पराक्रमम् ।
द्रौपदी न शशापैन यस्मात्तद्वदत शृणु ।
विक्षरन्ति तप क्रोधादृषयो न शपन्ति च ।
जानन्ती तद्यथातत्त्व द्रौपदी न शशाप तम् ।
क्षमा धर्मः क्षमा दानं क्षमा यज्ञ क्षमा यशः ।
क्षमा सत्य क्षमा शील क्षमा कीर्ति क्षमा परम् ।
क्षमा पुण्य क्षमा तीर्थ क्षमा सर्वमिति श्रुति ।
क्षमावतामयं लोक परश्चैव क्षमावताम् ।
एवत्सर्वं विजानन्ती सा क्षमामन्वपद्यत ।
भर्तृणा मतमाज्ञाय क्षमिणा धर्मचारिणाम् ।
नाशपत्त विशालाक्षी सती शक्तापि भारत ।
पाण्डवाश्चापि ते सर्वे द्रौपदी प्रेक्ष्य दुःखिताम् ।
क्रोधाग्निना व्यदह्यन्त तदा लज्जाव्यपेक्षया ।
अथ भीमो महाबाहु सूदयिष्यस्तु कीचकम् ।
वारितो धर्मपुत्रेण वेलयेव महोदधि ।
सधार्य मनसा रोष दिवारात्र विनिःश्वसन् ।
महानसे तदा कृच्छ्रात्सुष्वाप रजनीं च ताम् ।

Colophon.

20

After 4 17 10, T_1 ins

सहस्र वालखिल्यानां सहस्रमुदवासिनाम् ।
सहस्रमश्मकुट्टाना सहस्र वायुभोजिनाम् ।
सहस्र भुवि पत्नीना सहस्र ब्रह्मचारिणाम् ।
सहस्र वानप्रस्थानां सहस्र गृहमेधिनाम् ।
हंसा परमहसाश्च योगिनश्च द्विजातय ।
कुटीचका परिव्राजो ये चान्ये वनचारिण ।
नित्य भक्तास्मकाश्चैव बहवश्चोर्ध्वरेतस ।
चतुर्वेदविदो विप्रा शिक्षामीमासयो स्थिरा ।
पदक्रमपरा विप्रा सामाध्ययनिकाश्च ये ।

21

B Dn D_{1-7} $_{9-12}$ ins after 4 20 24^{ab} (B_3, after 4 20 22) K_2 D_8, after 4 20 24

अथ मा तत्र कैकेयी प्रेषयत्प्रेषणेन तु ।
तेनैव चोदिता पूर्वं भ्रातृप्रियचिकीर्षया ।
सुरामानय सैरन्ध्रि कीचकस्य निवेशनात् ।
सूतपुत्रस्तु मा दृष्ट्वा महत्सान्त्वमवर्तयत् ।
सान्त्वे प्रतिहते क्रुद्ध परामर्शमनाभवत् ।
विदित्वा तस्य सकल्पं कीचकस्य दुरात्मन ।
तथाह राजशरण जवेनैव प्रधाविता ।
सदर्शने तु मा राज्ञ सूतपुत्र परामृशत् ।
पातयित्वा तु दुष्टात्मा पदाहं तेन ताडिता ।
प्रेक्षते स्म विराटस्तु कङ्कश्च बहवो जना ।

the prior half) $M_{1.4}$ चित्रा (for तत्र) — (L 32) $M_{1.4}$ तां सुदष्णेति वै प्राहुर्विराटमहिषीं प्रियां — (L. 33) $M_{1.4}$ कीचक (for केकय) — After line 51, $M_{1\ 4}$ ins

मल्दान्निषधाश्चैव तुण्टिकेरांश्च कोङ्कणान् ।

— (L. 52) T G_2 किरातान् (for करदान्) T_1 M_1 मल्लिरिकान्, T_2 G_2 मल्लिच्छिकान् G_1 शिथिलान्मल्लकांस्तथा — (L. 55) M_1 °युतबल रणे — (L. 63) T_2 G_2 रक्षति च, $M_{1.3}$ क्षरन्तीति $G_{1.3}$ नाशयति (for न शपन्ति) — (L. 64) M_1 पाञ्चाली (for द्रौपदी) — G_1 om line 66 $M_{1\ 4}$ om. the posterior half of line 66 and the prior half of line 67 — (L 72) $G_{1.3}$ $M_{1\ 4}$ दुःखिता — (L 73) M_4 काल° (for लज्जा°) — Colophon *Adhy no* 20.

21

- (L. 1) B $D_{5.6}$ Cr प्रेषयत्, D_8 अप्रैषीत् B (except B_3) Dn $D_{4\ 11.12}$ Cr प्रणयेन (for प्रेष°) — (L. 2) $D_{6\ 7}$ तया (for तेन) K_2 $D_{4\ 7-9}$ नोदिता, B_4 प्रेषिता, Dn D_{10-12} देशिता $D_{7\ 9}$ तूर्णं, D_{10} पूर्व Dn_2 $D_{8\ 10\ 11}$ भ्रातु° (for भ्रातृ-) — (L 3) Dn $D_{5\ 11\ 12}$ कल्याणि, a few MSS सैरिन्ध्रि K_2 निकेतनात् — (L 5) Cv क्रुद्ध (as above), Cvp क्षुद्र — (L 6) D_6 त भाव (for सकल्प), and महा° (for दुरा°) — (L. 7) B_4 राजसदन, Cs as above. — (L. 9) B_4 D_4 बाधिता (for ताडिता) K_2 पदा तेनैव बाधिता, D_6 स तदा मां पदावधीत् — (L. 10) K_2 वीक्षते K_2 B_3 $D_{6\ 10}$ स (for स्म) B_2 ततो वीक्ष्य, B_4 तत्प्रेक्षको;

रथिनः पीठमर्दाश्च हस्त्यारोहाश्च नैगमाः ।
उपालब्धो मया राजा क्रुद्धश्चापि पुनः पुनः ।
ततो न वारितो राजा न तस्याविनयः कृतः ।
योऽयं राज्ञो विराटस्य कीचको नाम सारथिः ।
त्यक्तधर्मा नृशंसश्च नरस्त्री समतः प्रियः ।
शूरोऽभिमानी पापात्मा सर्वार्थेषु च लुब्धवान् ।
दारामर्शी महाभाग लभतेऽर्थान्बहूनपि ।
हरेदपि च वित्तानि परेषां क्रोशतामपि ।

Thereafter D3 *repeats* 24*cd*

22

After 4. 21 6, D3 ins

अथ ज्ञात्वा विराटोऽपि कृष्णामश्य तु कीचकम् ।
अब्रवीत्स प्रतीहारं द्वाःस्थ आनय कीचकम् ।
प्रहितः स विराटेन द्वाःस्थः कीचकमन्दिरम् ।
गत्वा तमब्रवीत्सूत मत्स्यस्त्वां द्रष्टुमिच्छति ।
कीचकोऽपि नृपादेशान्मत्स्यस्य भवनं ययौ ।
उवाच मत्स्यराजस्य प्रणिपत्य प्रविश्य च ।
आगतोऽहं महाराज विराट वचनात्तव ।
यदस्ति यदि वक्तव्यं श्रुत्वा यास्यामि वै गृहम् ।
विराट उवाच ।
कलत्रे वाथ वा मित्रे भृत्ये राज्ञि यथापि वा ।
निवेदितं सुखे दुःखे सुखं भवति कीचक ।
त्वमेव शरणं मह्यं राज्यं च त्वत्प्रसादतः ।
मत्वा वापि ममैव त्वं तेन त्वा प्रतिपेदिरे ।
पश्याम्यहर्निशं दुर्गं विपरीतं तु मण्डलम् ।
सधूमं ज्वलनं मन्ये वैमनस्यं च वाजिनाम् ।
शृणोमि च शिवां घोरामदिवा प्रतिभाषिणीम् ।
रात्रौ बलिभुजः संधाग्रच्च सूर्यस्य मण्डलम् ।
अन्यच्च सम्प्रभाषन्ते दैवज्ञा मम कीचक ।
मम द्वादशगः सौरिर्जन्मर्क्षे तव कीचक ।
पश्यामि हर्म्यपतनं कीचक भ्रातृपं विना ।
जानाम्येतैर्महोत्पातैर्युगान्तप्रतिमैरलम् ।
मृत्युस्ते भविता तथ्यमथ वा मम कीचक ।
शृणोमि वीर सैरन्ध्र्याः शूराः साहसकारिणः ।
गन्धर्वाः पतयः पञ्च सन्ति देवेन्द्रवल्लभाः ।
मुनिना केनचिच्छप्ताश्चरन्तीमां वसुंधराम् ।
रक्षमाणाश्च सैरन्ध्रीं भार्यां स्वीयां पतिव्रताम् ।
तेषां तु भार्यां त्वं वत्स सैरन्ध्रीं कर्तुमिच्छसि ।
न च शक्ता त्वया भोक्तुमेषा गन्धर्वरक्षिता ।
त्वं बालीव कामार्तः कार्यमेतन्न बुध्यसे ।
विद्युत्पातैरिमैः सौम्य मर्तव्यं भवता ध्रुवम् ।
कान्या चैवविधा नारी चरेद्वै क्षितिमण्डले ।
विना सैरन्ध्रीं भद्र ते स्वयं गन्धर्वरक्षिताम् ।
वृद्धो वा यदि वा स्वामी यदि वा भगिनीपतिः ।
राजा पूज्यः सदा मान्यः कर्तव्यं वचनं मम ।
कैकेयपुत्र तन्नाशात्त्यज सैरन्ध्रिजां कथाम् ।
कुलैषा महती भाति रूपेणातीव कीचक ।
त्यक्त्वा कामं सैरन्ध्र्या त्वं मदीयां ध्वजिनीं भवान् ।
गपालयस्व विश्रब्धो मद्भास्यात्कैकयात्मज ।
कीचक उवाच ।
सर्वथा भवदीयं मे कर्तव्यं वचनं तथा ।
तथाप्येषा मयावश्यं भोक्तव्या तनुमध्यमा ।
सैरन्ध्री यदि मे पार्श्वे स्थिता स्नेहेन भामिनी ।
शेते न शयने मत्स्य तदा मन्ये मृतं स्वयम् ।
याचते मां भृशं कामः सैरन्ध्र्यर्थं नराधिप ।
जीवितं तृणवत्त्यक्त्वा भोक्तव्या हि मया शुभा ।
न लोकमपि गन्धर्वा मयि शक्ता विशां पते ।
वैशंपायन ।
स मन्मथार्तो नृपतिं गतस्तु
त्यक्त्वा तु वाक्यं नृपतेर्नरेन्द्र ।
संयोगमिच्छन्द्रुपदात्मजायाः
संधायमानो विदितं स मृत्युम् ।
Colophon (*adhy no* 22)

23

After 4 21 49, N ins.

कीचकानां तु मुख्यस्य नराणामुत्तमस्य च ।
अन्योन्यमभिसंरब्धौ परस्परवधैषिणौ ।
वालिसुग्रीवयोर्भ्रात्रोः पुरेव कपिसिंहयोः ।
ततः समुद्यम्य भुजौ पञ्चशीर्षाविवोरगौ ।
नखदंष्ट्राभिरन्योन्यं घ्नतः क्रोधविषोद्धतौ ।

D7 9 तत्रैक्षत (for प्रैक्षत स) Some MSS (incl. Dn) तु (for च) D3 प्रैक्षतन्तु विराटस्य D8 प्राक्रोशन् (for क्रुद्ध) — (L. 13) K2 D3 ततो न, D7 9 न तेन (for ततो न) K2 D5–10 C3 r विनय, B3 नियम (for अविनय) — (L. 15) K2 B1.3 Dn D5.8 10 °धर्मो K2 न नस्य समत Cn analyses नर्ग्नोसमत (cf. Cs) — (L. 16) K2 शूरो-वमानी, B1 D3 10 शूरमानी च, B5 D2 शूराभिमानी K2 अपि मौनमान्, B2 च लोभवान, B4 D3 च लुब्धवान्, D7 9 तथा धने (for च लुब्धवान्) Cr cites लोभवान्, Crp (Dev) मुख्य-वान्, Ca.c s rp मुग्धवान् — (L. 17) K2 दारानथा; D1m 7 दारान्दर्पान्, some MSS °मया — (L 18) K2 D8 10 उद्धरेदपि, Dn D11 12 आहरेदपि (for हरेदपि च)

23

Lines 2 and 3 are transp in B4 Dn D8.11.12 — (L. 2) Om in D8 B (except B2) D2 10–12 °न्यमपि संरब्धौ, D1 8 °न्य जयसंरम्भात्, D4 °न्य तौ सुसंरब्धौ, D7 9 °न्यमभिसंरम्भात् K B1.5 Dn D5(m as above) 11.12 °वधै° (for °वधे°) — (L 3) D1.8 7 9 पुरा वा नरसिंहयो ,

25

After line 3 of 448* (cf v. l. 4 21 58), T G3 ins

महतोऽत्युत्य वेगेन कीचकोरसि वीर्यवान् ।
जानुभ्यां ताडयामास सोऽपि पादौ प्रगृह्य च ।
भ्रामयामास वेगेन ताडयामास च क्षितौ ।
भीमोऽपि लाघवात्पादौ मोचयित्वोरुविक्रमः ।
उत्प्लुत्य सोर्ध्वमपतत्कीचकस्य शिरोपरि ।
केशे गृहीत्वा चाकृष्य विचकर्ष स सर्वतः ।
हस्तौ गृहीत्वा भीमस्य कीचको बलगर्वितः ।
मोचयित्वा केशपक्षं गले जग्राह पाण्डवम् ।
गृहीतकण्ठावन्योन्यं पातयामासतू रणे ।
हुंकारफूत्कृतोच्छ्वासौ मार्जाराविव कोपितौ ।
कीचकोपरि कौन्तेयः कौन्तेयोपरि कीचकः ।
अन्योन्यं पातयित्वैव मुहूर्तं सूतपाण्डवौ ।
पुनरुत्थाय तौ वीरावन्योन्यं बाहुशालिनौ ।
बाहुयुद्धमयुध्येतामुपतापप्रकोपितौ ।
पादाभ्यां चैव जानुभ्यां मुष्टिभ्यां च परस्परम् ।
एवं तयोः प्रहरतोर्भीमकीचकयोस्तदा ।
स्वनः समभवद्रात्रौ विस्फूर्जितमिवाशने ।
लब्ध्वान्तरमथो भीमः पाणिभ्यां कीचकं बली ।
हीयमानं समुद्वीक्ष्य बभञ्जालिङ्ग्य मध्यतः ।
उत्तानं पातयित्वैनं पादाभ्यामुरसि स्थितः ।
सम्मृज्य पाणिना पांसु दक्षिणेन दृढाकृतिः ।
मुष्टिं गृहीत्वा वेगेन शिरस्यभिजघान ह ।
मुष्टिघातेन तेनासौ निर्यज्जिह्वाक्षितारकः ।
विसृजन्मलमूत्रे च क्रोशन्मद्द्विपवत्स्वरम् ।

26

After 4 22 26, T G3 ins

मा खिद्यस्व याज्ञसेनि पातिव्रत्यव्रते स्थिता ।
पातिव्रत्यस्थिता नारी भव रक्षेत्सदात्मनः ।
पुरा स्त्री देवरातस्य पतिव्रता शिरोमणिः ।
कदाचिद्भर्तृरूपेण रक्षसापहृता सती ।
कस्यचित्सरसस्तीरे वा निवेश्य स राक्षसः ।
तद्भर्तृरूपं संत्यज्य रक्षो भूत्वा सुदारुणम् ।
साम्ना दानेन भेदेन सा यदा नान्वमन्यत ।
तदा तां पातयित्वा स मैथुनायोपचक्रमे ।
ततः सा धैर्यमास्थाय विवरं न ददौ तदा ।
ततः स खड्गमुत्कृष्य भीषयामास तां सतीम् ।
साभिलक्षभया साध्वी प्राणत्यागे सुनिश्चिता ।
प्रतिज्ञामकरोत्कृष्णे पतिव्रतपरायणा ।
आराधितो यदि मया भर्ता मे दैवतं महत् ।
कर्मणा मनसा वाचा गुरवस्तोषिता मया ।
तेन सत्येन योनिर्मे भवत्वद्य शिला दृढा ।
एवं तया प्रतिज्ञाते तद्योनिः सा शिलाभवत् ।
अन्तरा नाभिजान्वोर्यत्तत्सर्वं च शिलाभवत् ।
ततः स खड्गमुत्कृष्य वेगेनास्याः शिरोऽहरत् ।
जया नाम सखी साभूत्पार्वत्या नखमांसवत् ।
तस्मात्पतिव्रतायाश्च दुःखमल्पं सुखं बहु ।

27

S ins after 4. 28 14 (G1 M3, which om. st. 13–14, ins after 12)

वैशंपायन ।
ततो दुर्योधनो वाक्यं श्रुत्वा तेषां महात्मनाम् ।
मुहूर्तमिव संचिन्त्य सचिवानिदमब्रवीत् ।
श्रुतं ह्येतन्मया पूर्वं कथासु जनसंसदि ।
धीराणां शास्त्रविदुषां प्राज्ञानां मतिनिश्चये ।
कृतीनां सारफल्गुत्वे जानामि नयचक्षुषा ।
सत्त्वे बाहुबले धैर्ये प्राणे शारीरसंभवे ।
साम्प्रतं मानुषे लोके सदैत्यनरराक्षसे ।
चत्वारस्तु नरव्याघ्रा बले शक्रोपमा भुवि ।
उत्तमाः प्राणिनां तेषां नास्ति कश्चिद्बले समः ।
समप्राणबला नित्यं संपूर्णबलपौरुषाः ।
बलदेवश्च भीमश्च मद्रराजश्च वीर्यवान् ।
चतुर्थः कीचकस्तेषां पञ्चमं नानुशुश्रुम ।
अन्योन्यानन्तरबलाः परस्परजयैषिणः ।
बाहुयुद्धमभीप्सन्तो नित्यं संरब्धमानसाः ।
तेनाहमवगच्छामि प्रत्ययेन वृकोदरम् ।
मनस्यभिनिविष्टं मे व्यक्तं जीवन्ति पाण्डवाः ।

सौख्यं प्राप्स्यामि परमं (for the prior half) — (L. 15) Ś1 K क्रोधमनाथ°. — (L. 17) B1 Dn D11. 12 उद्भ्रान्तनेत्र, D2 8 विभ्रांत° — (L. 18) B2 विष्पिप्य, D8 निघृष्य B (except B3) Dn D1. 9 11 12 °पुट (B4 °पुटौ) बली, D3 °बलीयसा. — After line 18, D8 *repeats* line 10 — After line 18, B4 ins

अभ्याहनन्महाराज पदाघातैश्च दारुणैः ।

— After line 19, D8 ins

अभ्याहनन्महाबाहुः पादाष्ठीले सुदारुणे ।

(a v l. of the previous insertion)

27

After वैश°, T1 ins .

भीष्मद्रोणकृपैरुक्तैः कर्णदुःशासनादिभिः ।

— (L 4) T1 G वीराणां (for धीराणां) T1 G1. 3 शस्त्र° (for शास्त्र°) — (L. 5) T2 G2 °फल्गुत्व — (L. 12) T1

तत्राहं कीचकं मन्ये भीमसेनेन मारितम् ।
सैरन्ध्रीं द्रौपदीं मन्ये नात्र कार्या विचारणा ।
शङ्के कृष्णानिमित्तं तु भीमसेनेन कीचकः ।
गन्धर्वव्यपदेशेन हतो निशि महाबलः ।
को हि शक्तोऽपरो भीमात्कीचकं हन्तुमोजसा ।
शस्त्रं विना बाहुवीर्यात्तथा सर्वाङ्गचूर्णितम् ।
सर्वेतु वा तथा शीघ्रं चर्ममांसास्थिचूर्णितम् ।
रूपमन्यत्समास्थाय भीमस्यैतद्विचेष्टितम् ।
ध्रुवं कृष्णानिमित्तं तु भीमसेनेन सूतजः ।
गन्धर्वव्यपदेशेन हतो निशि न संशयः ।
पितामहेन ये चोक्ता देशस्य च जनस्य च ।
गुणास्ते मत्स्यराष्ट्रेषु बहुशोऽपि मया श्रुताः ।
विराटनगरे मन्ये पाण्डवाश्छन्नचारिणः ।
निवसन्ति पुरे रम्ये तत्र यात्रा विधीयताम् ।
मत्स्यराष्ट्रं गमिष्यामो ग्रहीष्यामश्च गोधनम् ।
गृहीते गोधने नूनं तेऽपि योत्स्यन्ति पाण्डवाः ।
अपूर्णे समये चापि यदि पश्याम पाण्डवान् ।
द्वादशान्यानि वर्षाणि प्रवेक्ष्यन्ति पुनर्वनम् ।
तस्मादन्यतरेणापि लाभोऽस्माकं भविष्यति ।
कोशवृद्धिरिहास्माकं शत्रूणां निधनं भवेत् ।
कथं सुयोधन गच्छेद्युधिष्ठिरस्त्वत पुरा ।
एवमपि यत्नं मात्स्यः परिभवान्मयि ।
तस्मात्कर्तव्यमेवेदं तथान्यात्रा विधीयताम् ।
एतत्सुनीतं मन्येऽहं सर्वेषां यदि रोचते ।

28

After 4. 29. 19, D_4 (marg.) $_5$ (on suppl. fol.) $_6$ (marg.) ins.:

दुर्योधन उवाच ।
उक्तमेतद्विधेय वा वाक्यमुक्तं त्वयानघ ।
यदैव चारैः प्रदिष्टैरिहागम्य निवेदितम् ।
निधनं सूतपुत्रस्य कीचकस्य बलीयसः ।
तदैव हि महाचिन्ता हृदि पाण्डुसुतान्प्रति ।
कीचकं बलसंपन्नं नान्यो हन्ता वृकोदरात् ।
नियमेन हि पार्थानां विराट प्रियमिच्छति ।
संग्रामे चापि विश्वस्ता नियोगाय स्थिता ध्रुवम् ।
पितामहेन यच्चोक्तं [ ] पार्थनिवेदने ।
तद्धि राज्ञो विराटस्य धूर्ते विषये [ ] ।
तत्र गत्वा वर्गांश्च विराट गो धन यथम् ।
गृहीष्यामस्य राष्ट्रं च प्रसह्य स्वपर्वयुतः ।
अनुयास्यन्ति ते चापान्विराटस्य हितैषिणः ।
तत्र तेऽस्माभिः शक्ये गुप्ता चैषां यथागतिम् ।
अपूर्णसमयान्भूयो वनाय गमयामहे ।
इतरापि चैवास्मिंश्च मम भोक्ष्याम मेदिनीम् ।
अल्पावशिष्टः कालोऽयं समयश्च विभाति मे ।
उद्योजयाम सैन्यानि श्वोभूते गमनं प्रति ।

कर्ण उवाच ।

यदि तत्र गता ते पार्था भवेयू राजसत्तम ।
शिशिरे वोसगर्द्धी तस्मात्तथापि खलु यास्यथ ।
निमहाला विराटस्य पाण्डवानां प्रबोधनम् ।
दीनास्ते कोशहीनाश्च वनवासेन कर्शिताः ।
सुखेन हन्तुमर्हन्ति अथ प्रवासनाय वै ।

29

After 4. 30. 3, $_8$ ins.:

ततः शब्दो महानासीद्वेणुश्च दिवमस्पृशत् ।
शङ्खदुन्दुभिनिर्घोषो भेरीणां च महास्वनः ।
गजाश्वरथनागानां नराणां च पदातिनाम् ।
एवं तैस्त्वभिनिर्याय मत्स्यराजस्य गोधने ।
त्रिगर्तैर्गृह्यमाणे तु गोपालाः प्रत्यषेधयन् ।
अथ त्रिगर्ता यत्नवः परिगृह्य धनं बहु ।
परिक्षिप्य हयैः शीघ्रं रथव्रातैश्च भारत ।
गोपालान्प्रत्ययुध्यन्त रणे कृत्वा जये धृतिम् ।
ते हन्यमाना बहुभिः प्रासतोमरपाणिभिः ।

M (except M_4) °शुश्रुम — (L. 17) T G_2 पातित (for मारितम्) — (L. 20) M_2 न संशय (for महा°). — $G_{1,2}$ om. line 23 — (L. 24) M समानेतु (for समास्थाय) T G_2 तथा भीमस्य चेष्टित (for the posterior half) — (L. 25) T_1 कीचक, $G_{1,2}$ कीचका, $M_{1,2,5}$ सूतजा — (L. 26) T_1 $M_{1,2,5}$ हता (for हतो) T_2 G_2 युधि (for निशि) — (L. 28) T G_2 मात्स्य°, M °राष्ट्रस्य (M_5 °राष्ट्रपि) — (L. 31) T $M_{1,4,5}$ हनि° (for गमि°) — (L. 33) T_2 G_2 M_4 पश्येम — (L. 38) G_1 °हत; G_2 °हृत, M_2 °हृा (for °स्मृा) $G_{1,2}$ पुन (for पुरा) — (L. 39) G M_4 नतत्र (for तस्मि)

28

Cf. the previous passage (No. 27), which is similar in sense. Here are the v. l. of D_5: — (L. 1) युक्तमुक्त हि राजेन्द्र वाक्यमेतत्त्वयानघ — (L. 13) यथालिङ्ग यथागति (for the posterior half) — (L. 23) सुखमाप्त्या भविष्यति पार्थिवा इति मे मति

29

(L. 2) G_1 घोषश्च, $M_{1,2}$ निर्घोषा, M_3 घोषाश्च M_{1-3} °स्वना M om. line 3 — (L. 9) T_1 G_2 $M_{1,2,4}$ रथिभि (for बहुभि) T_1 G_2 M मारिभि प्रासपाणि(T_1 G_2 °धारि)भि — (L. 14) T_2 G_2 गोपान्विद्रावयमाणे, $G_{1,3}$ गोपालान्द्रावयमाणे,

गोपाला गोकुले भग्ना वारयामासुरोजसा ।
परश्वधैश्च मुसलैर्भिण्डिपालैश्च मुद्गरैः ।
गोपालाः कर्षणैश्चित्रैर्जघ्नुरश्वान्समन्ततः ।
ते हन्यमानाः संक्रुद्धास्त्रिगर्ता रथयोधिनः ।
विसृज्य शरवर्षाणि गोपान्व्यद्रावयन्रणे ।
ततो युवानः सन्नीताः श्वसन्तो रेणुगुण्ठिताः ।

30

After 4. 31. 19, D1 ins.:

अयुध्यन्त रणे वीराः शूराः परिघबाहवः ।
कबन्धाः समरे हन्तुं महायोधाः प्रचक्रमुः ।
हन्यता हन्यतामेव शिरांसि पतितान्यपि ।
कबन्धान्प्रेरयामासुर्हुंकारोच्चारणादिभिः ।
विराटश्च महाश्चर्यं दृष्ट्वा कौतुकमागतः ।
हर्षं लेभे परं राजा मनस्येवंविधा नराः ।
कबन्धेन शतं योधाः पातिता रणमूर्धनि ।
ततः कबन्धः पतितः पुष्पवर्षं सहैव तु ।
विमानं प्रेरितं देवैरप्सरोभिः समावृतम् ।
समक्षं सर्वयोधानां तत्रारूढो दिवं ययौ ।
न शेकुरपि संक्रुद्धाः शूराः कर्तुं पराङ्मुखान् ।

This is followed by 11–14, 578*, 582*, 20, 21 etc.

31

After 4. 32. 21, Dn D5 (on suppl. fol.) 1 2. 11. 12 ins.:

वैशंपायन उवाच ।
एवमुक्तस्तु वेगेन भीमसेनो महाबलः ।
गृहीत्वा तु धनुःश्रेष्ठं जवेन सुमहाजवः ।
विमुञ्चञ्छरवर्षाणि सतोय इव तोयदः ।
स भीमो भीमकर्माणं सुशर्माणमथाद्रवत् ।
विराटः समवीक्ष्यैनं तिष्ठ तिष्ठेति चावदत् ।
सुशर्मा चिन्तयामास कालान्तकयमोपमम् ।
तिष्ठ तिष्ठेति भाषन्तं पृष्ठतो रथपुंगवः ।
पश्यतां सुमहत्कर्म महद्युद्धमुपस्थितम् ।
परावृत्तो धनुर्गृह्य सुशर्मा भ्रातृभिः सह ।
निमेषान्तरमात्रेण भीमसेनेन ते रथाः ।
पातिता भीमसेनेन विराटस्य समीपतः ।
रथानां च गजानां च वाजिनां च ससादिनाम् ।
सहस्रशतसंघाता शूराणामुग्रधन्विनाम् ।
पत्तयो निहतास्तेषां गदां गृह्य महात्मना ।
तद्दृष्ट्वा तादृशं युद्धं सुशर्मा युद्धदुर्मदः ।
चिन्तयामास मनसा किंशेषं हि बलस्य मे ।
अपरो दृश्यते सैन्ये पुरा मग्नो महाबले ।
आकर्णपूर्णेन तदा धनुषा प्रत्यदृश्यत ।
सुशर्मा सायकांस्तीक्ष्णान्क्षिपते च पुनः पुनः ।

32

Ś1 K ins. after 604* (for sequence see below); B D, after 4. 32. 35^{ab}:

विराटस्य महात्मानः परिक्लेशविनाशनाः ।
स्थिताः समक्षं ते सर्वे स्वयं भीमोऽभ्यभाषत ।
नायं पापसमाचारो मत्तो जीवितुमर्हति ।
किं तु शक्यं मया कर्तुं यद्राजा सततं घृणी ।
गले गृहीत्वा राजानमानीय विवशं वशम् ।

M विद्रुतेषु दिशो दश (M5 गोपालान्भ्यचकाड्क्षत्). — After line 14, T1 ins.:

हन्यमानेषु गोपेषु विद्रुतेषु दिशो दश ।

— (L. 15) Om. in G1 M1.2. T1 G2 रेणुकुण्ठिताः, T2 G3 °मूर्च्छिताः.

31

Of the comm. only Cn.s comment on some of these lines (Cn on lines 7–8, 10, 16–18; Cs on lines 5, 16). — D5 om. line 2. — (L. 3) Dn2 D1 2 विमुञ्चन्. — (L. 4) D5 1 2 अभितः (for अथाद्र°). — (L. 5) D5.1 2 विराटमभिसंप्रेक्ष्य. D5 चाब्रवीत्, D1 2 चाब्रुवत्. — (L. 7) D5 1 2 भानुमन्तं (for भाषन्तं), and D5 1 2 रथिपुंगवः (for the posterior half). — (L. 13) After line 10, D5.2.11.12 read line 13. D5.1 2 संघाताः (for संघाता). D5 दुर्धराणामुग्रधन्विनाम्, D1 °णां च सुधन्वि°. — (L. 17) D5 1 2 अथ सम्यक्सैन्येषु पुरा भग्ने तथा बले. — (L. 19) D5.1 क्षिपेत (for क्षिपते).

32

The sequence of the lines in Ś1 K (which om. altogether lines 2–4, 11–12) is as follows: Ś1 6, 5, 7–10, 13–21, (lines 33^{ab}, 34, 35^{ab} of text), 1, 22–23, (line 35^{cd} of text), K 6, 5, 7–10, 13–21, (stanzas 33–34 of text), 22, (line 35^{ab} of text), 1, (line 35^{cd} of text). These transpositions and omissions are mostly ignored in the foll. notes. — (L. 1) Om. in D4. K महाराजा, Dn2 D11.12 महाराज. — (L. 2) B2 D5 भीमसेनोऽब्रवीदिदं (for the posterior half). D4 त्वयास्य तदा भीम स चोवाच महाबल; Cop rp प्राह भीमो महाबाहुरिदं वचनमर्थवत्, Crp (Cat.) as above. After line 2, B3 ins. a line which is given as a v. l. in Cop.rp for line 2. — (L. 5) B1.2.5 D5 Cc rp (Cat.) नीतो, Cr गले (as above). D3 शैगवम् (for राजानम्). Dn2 D4.11.12 आनयामास चैव हि, D1 अवशं स्ववशे तत, D3 अवशं पाण्डुरहितं. — (L. 6) Ś1 K

तत एन विचेष्टन्त बद्ध्वा पार्थो वृकोदर ।
रथमारोपयामास विसंज्ञं पांसुगुण्ठितम् ।
अभ्येत्य रणमध्यस्थमभ्यगच्छद्युधिष्ठिरम् ।
दर्शयामास भीमस्तु तामवस्थां सुशर्मण. ।
प्रोवाच पुरुषव्याघ्रो भीममाहवशोभिनम् ।
त राजा प्राहसद्दृष्ट्वा मुच्यतां वै नराधम ।
एवमुक्तोऽब्रवीद्भीम सुशर्माणं महाबलम् ।
जीवितु चेदिच्छसे मूढ हेतु ते वदत शृणु ।
दासोऽस्मीति त्वया वाच्य समरसु च सभासु च ।
एव ते जीवित दद्यामेष युद्धजितो विधिः ।
तमुवाच ततो ज्येष्ठो भ्राता सप्रणय वच· ।
मुञ्चेममधमाचार प्रमाण यदि ते वयम् ।
दासभाव गतो ह्येष विराटस्य महीपते ।
अदासो गच्छ मुक्तोऽसि मैव कार्षी. पुन· कचित् ।
एवमुक्ते तु सव्रीड सुशर्मासीदधोमुखः ।
स मुक्तोऽभ्येत्य राजानमभिवाद्य प्रतस्थिवान् ।
प्रमुच्य च सुशर्माण पाण्डवास्ते हतद्विप ।
स्वबाहुबलसपन्ना ह्रीनिषेवा यतव्रता· ।

☞ This is a badly fitting *replica* of a scene at the end of the Jayadratha vimoksana in the Āraṇyaka (cf B 3 272 7-21), from which another short passage has been utilized by the interpolator earlier in the course of this parvan (cf v l. 4 15 6). — Lines 22–23 are a *variant* of 4 32 34^{cd}–35^{ab}, a sure sign of interpolation!

33

After 4 32 47^{ab}, S ins.

पुनरेव विराटश्च राजा कङ्कमभाषत ।
अहो शूरस्य कर्माणि वल्लवस्य द्विजोत्तम ।
सोऽहं शूरेण सग्रामे वल्लवेनाभिरक्षितः ।
त्वत्कृते सर्वमेवैतदुपपन्न ममानघ ।
वर वृणीष्व भद्र ते ब्रूहि किं करवाणि ते ।
ददानि ते महाप्रीत्या रत्नान्युच्चावचान्यपि ।
शयनासनयानानि कन्याश्च समलंकृता. ।
हस्त्यश्वरथमर्धाश्च राष्ट्राणि विविधानि च ।
तथैव च मम प्रीत्या प्रतिगृह्य ममान्तिके ।
वैशपायन ।
त तथा वादिन तत्र कौरव्य प्रत्यभाषत ।
एषैव तु मम प्रीतिर्यत्त्व मुक्तोऽसि शत्रुभि ।
प्रतीतश्चेत्पुनस्तुष्ट प्रवेक्ष्यसि तदानघ ।
दारै पुत्रैश्च सश्लिष्य सा हि प्रीतिर्ममातुला ।
सुशर्माण तु राजेन्द्र सभृत्यबलवाहनम् ।
विसर्जय नरश्रेष्ठ वरमेतदहं वृणे ।
एवमुक्तस्तु कङ्केन विराटो राजसत्तम ।
प्रत्युवाच तत कङ्क सुशर्मा यातु चेष्टत· ।

34

After 624* (cf v l 4 31 12), G1 ins.·

एतेन वै सारथिना तदार्जुन.
स देवगन्धर्वमहोरगासुरान् ।

प्र(Ś1 स)कामभयपीडित (for the posterior half) — (L. 7) D1–3 विवश (for विसंज्ञ) — (L 8) Ś1 K कृत्वा त रथमध्यस्थ Cr cites अभ्येत्य — (L 9) D7 (before corr) ० तदावस्थां Ś1 K B1 5 Dn D11 12 सुशर्माण नराधिप (for the posterior half) — (L 10) Some MSS व्याघ्र Ś1 उवाच च ततो भीम, K D6 तमुवाच ततो ज्येष्ठो Ś1 K1 मुचामु वै महाबल, K2 मुच मुच महाबल — (L 11) D6 त्रिगर्तं (for त राजा) B8 D1–6, 10 प्राहसन्, B4 D8 प्राहसन् D3 आह (for दृष्ट्वा) D8 Cv नराधिप — (L. 12) Om in Ś1 K B2 Dn D1, 3 4 10–12 D5 7–9 ततो भीमोऽब्रवीन्मूढ (D8 °भीदाक्य) त्रिगर्तानां नराधिप — After line 12, D2 (marg) ins

उवाच पुरुषव्याघ्र नृपस्य वचने रत· ।

— (L. 13) Ś1 जीव चेदिच्छसे मूढ, K2 (corrupt) जीवितु मिच्छसि चेन्मूढ, D4 7 (m as above) ० जीवमिच्छसि चेन्मूढ Ś1 मे (for ते) B2 Dn1 D1 3 4 5 10 गदत (for वदत) — (L. 14) Ś1 K सदा (for त्वया) — (L 16) Ś1 K तदा (for ततो), and भ्राता भीम महाबल Ca cites सप्रणय — (L 17) Om in B2 Dn1 मुंच मुच, D4, 7–10 मुचैनम् B8 Dn1 D1–7 9 Ca.c rp (Cat) प्रमाणा, Cr cp as above — (L. 19) Dn1 D8 कदाचन (for पुन कचित्) — After line 19, Dn1 alone ins a colophon, followed by वैश° उ°, which is copied by most of the printed editions! — (L. 20) Ś1 K B8 D6 उक्तस्तु, D1 3 स उक्त , D8 स मुक्त (for उक्ते तु) Ś1 K तूष्णीं किंचिदधोमुख — (L. 22) Om in D4 Ś1 Dn1 विसृज्य तु, B1 2 5 Dn2 D6 10–12 अवमुच्य, D5 7 9 प्रमुच्याथ — After line 22, D6 *repeats* line 1 K B2 4 D1–5 7–10 om line 23, which is itself a *repetition* (with v l) of 35^{ab}

33

(L. 2) G1 शूरस्य (for शूद्रस्य) — (L 6) M5 ददामि — (L. 9) G1 3 M5 एतानि च, M4 (*sup lin* as in text) सर्वमेव (for तथैव च) — (L. 12) M1–3 प्रविशाद्य परतप (for the posterior half) — (L 15) M1–3 नृप° (for नर°)

सर्वाणि भूतान्यजयत्स वीर्यवान्
अतर्पयच्चापि हिरण्यरेतसम् ।
यदस्य सख्यामपि तस्य सयुगे
जानामि वीर्यं परवीर्यमध्यग ।
सगृह्य रश्मीनपि वार्य वीर्यवान्
आदाय चाप प्रययो रथे स्थित ।
न सर्वभूतानि न देवदानवा
न चापि सर्वे कुरव समागता ।
धन हरेयुस्तव जातु धन्विनो
बृहन्नला तूत्तरसारथिर्यदि ।

35

After 4 36 40, D4 ins the foll passage, of which D5 ins, at the some point, lines 2–3 only

प्रगृह्यैवद्धन सर्वं मुञ्च मा त्व बृहन्नडे ।
आरनालेन जीविष्ये न मे गोभि प्रयोजनम् ।
जीवन्प्राप्स्यामि गा ह्यन्या निवर्तस्व बृहन्नडे ।
अर्जुन उवाच ।
यशो हि कल्पान्तशतैकसाक्षि
न जीवित कुञ्जरकर्णलोलम् ।
क्षितिपालसूनो भव रङ्गमध्ये
लज्जामहे सगररङ्गभङ्गात् ।
उत्तर उवाच ।
या कीर्तिरुत्सर्पति देहनाशे
धिग्दुस्सदा मूलविनाशिनीं ताम् ।
विक्रीय देह द्रविणेन को नु
यात्राकृत देवकुले करोति ।

36

T1 ins after 4 37 10[ab] G3 (which om 10–11), after 4 37 9

ये जेतारो मही‍पानाममुना बहवो हता ।
यस्मिंस्तेजो महत्कृत्स्न निर्भरोच्छ्रसित भवेत् ।
येन मे दक्षिणा दत्ता बद्ध्वा द्रुपदमोजसा ।
विद्ध्वा वियद्गत लक्ष्यं विनिर्जित्य च पार्थिवान् ।
निर्जितानेन पाञ्चाली पुरानेन स्वयवरे ।
खाण्डवे येन सतृप्तो वह्निर्जित्वा सुरासुरान् ।
परिणीता सुभद्रा च येन निर्जित्य यादवान् ।
निर्जितो येन युद्धेन त्रिपुरारि स्मरार्दन ।
गत्वा त्रिविष्टप येन जितेन्द्रा दानवा युधि ।
निवातकवचा राजन्दानवाना त्रिकोटय ।
निर्जिता कालकेयाश्च हिरण्यपुरवासिन ।
येन त्व मोचितो बद्धश्चित्रसेनेन तद्वने ।
येन गत्वोत्तर मेरोरानिनाय महद्धनम् ।
याजितो धर्मसूनुश्च नृपान्सर्वान्विजित्य च ।
यस्मिञ्शौर्यं च वीर्यं च तेजो धैर्यं पराक्रम ।
औदार्यं चैव गाम्भीर्यं ह्रीः श्रीर्धर्मो दयार्जवम् ।
एवमादिगुणोपेत सोऽय पार्थो न सशय ।

37

After 4 39 19, S (which om. st 20) ins

माता मम पृथा नाम येन मा पार्थमब्रुवन् ।
देवदानवगन्धर्वान्पिशाचोरगराक्षसान् ।
अह पुरा रणे जित्वा खाण्डवेऽग्निमतर्पयम् ।
हुताशन तर्पयित्वा सहित शार्ङ्गधन्वना ।
त्रिविष्टपगतो दृष्ट्वा पितामहमहेश्वरौ ।
मूर्च्छया पतित भूमावागतौ देवसत्तमौ ।
दृष्ट्वा तौ वरदौ देवौ सज्ञा लब्ध्वोत्थित पुन ।
मूर्ध्नाभिप्रणत भूमौ तौ तदा वरदौ वरौ ।
कृष्णेत्येकादश नाम प्रीत्या मे तत्र चक्रतु ।
तुष्टौ च मम वीर्येण कर्मणा चाभिराधितौ ।
सर्वदेवै परिवृतौ भूयो मा स्वयमूचतु ।
वर तात वृणीष्वेति यथार्थयसि पाण्डव ।
ततोऽहमस्त्राण्यलभ दिव्यानि च दृढानि च ।
ब्राह्म पाशुपत चैव स्थूणाकर्णं च दुर्जयम् ।
ऐन्द्र वारुणमाग्नेय वायव्यमथ वैष्णवम् ।
ततोऽहमजय भूयो रथेनैन्द्रेण दुर्जयान् ।
मातलि सारथिं कृत्वा निवातकवचाग्रणे ।
अवध्यकवचान्देवैर्वरदत्तान्महासुरान् ।
तिस्र कोटीर्दानवानां सयुगेष्वनिवर्तिनाम् ।
एको निर्जित्य संग्रामे भूयो देवानतोषयम् ।
ततो मे भगवानिन्द्र किरीटमददात्स्वयम् ।
देवाश्च शङ्खमददु शत्रुसैन्यनिवारणम् ।
अह पारे समुद्रस्य हिरण्यपुरवासिनाम् ।

35

(L. 2) C3 cites आरनाल

37

(L. 7) G1 लब्ध्वेरित, M1 °स्थित — (L 8) M1–3 अभि॰ प्रणत, M4 मूर्ध्ना निपतितौ — (L 10) M1 2 4 (sup lin as above) चाभितोषितौ, M3 °नदितौ — (L. 12) T1 G य (for यत्) — (L. 18) T1 G सर्वान्हत्वा महारथान् (for the posterior half) — (L 20) M समरे (for संग्रामे) — (L. 21) T1 G प्रददात् (for अददात्) — (L. 22) T1 G M3 (sup lin as above) °विश° (for °निवा°) — (L. 23) = (var) 4. 56 11[ab] M2.4

हत्वा षष्टिसहस्राणि जय सम्प्राप्तवानहम् ।
असम्भ्रान्तो रथे तिष्ठन्समरेषु शरेषु च ।
शत्रुमध्ये दुराधर्षा न मुह्यन्ति च मे दिश ।
अह गन्धर्वराजेन ह्रियमाण सुयोधनम् ।
भ्रातृभि सहित तात गन्धर्व समरे जितम् ।
चतुर्दश सहस्राणि हत्वा चैनममोचयम् ।
मा भैर्विगतसन्त्रास. कुरूनेतान्समागतान् ।
सुयोधनस्य मिषत कर्णस्य च कृपस्य च ।
पितामहस्य भीष्मस्य द्रोणद्रौणस्य च स्वयम् ।
सर्वानेव कुरुश्रेष्ठ प्रतानेष्यामि ते पशून् ।

Colophon

38

After 4 39 23, D_3 ins

न चार्तव्य त्वया वीर लोकपालसमो ह्यसि ।
प्रसादये महाबाहो पूर्व यत्स्खलित मम ।
तावन्मेऽभूद्भय पार्थ यावत्त्वां नावलोकये ।
विभयो दर्शनात्तुभ्य कस्त्वां योद्धुमेजिजीविषु ।
एव प्रहृष्टरोमाणं सूते मात्स्यसुतोऽर्जुनम् ।
प्राञ्जलि. समुपातिष्ठद्रागवो दुहिण यथा ।
ततोऽर्जुन' समाश्वास्य मत्स्य वैराटिमब्रवीत् ।
उवाच मुदित काले समो हत्वा यथा रवि ।
आश्वास्य पुत्र मात्स्यस्य धनुर्विस्फार्य गाण्डिवम् ।
प्रेक्षणीयतमो भूत्वा तस्थौ दीप्तो रविर्यथा ।

39

After 4 40 27, N (D_1 missing) ins

उत्तर उवाच ।

एकस्त्व पाण्डवश्रेष्ठ बहूनेतान्महारथान् ।
कथ जेष्यसि सग्रामे सर्वशास्त्रास्त्रपारगान् ।
असहायोऽसि कौन्तेय ससहायाश्च कौरवा ।
अत एव महाबाहो भीतस्तिष्ठामि तेऽग्रत ।

वैशम्पायन उवाच ।

उवाच पार्थो मा भैषी. प्रहस्य स्वनवत्तदा ।
युध्यमानस्य मे वीर गन्धर्वै. सुमहाबलै ।
सहायो घोषयात्रायां कस्तदासीत्तदा मम ।
तथा प्रतिभये तस्मिन्देवदानवसकुले ।
खाण्डवे युध्यतो मे कस्तदासीत्तदा मम ।
निवातकवचै. सार्धं पौलोमैश्च महाबलै ।
युध्यतो देवराजार्थे क सहायस्तदाभवत् ।
स्वयवरे तु पाञ्चाल्या राजभि सह सयुगे ।
युध्यतो बहुभिस्तात क सहायस्तदाभवत् ।
उपजीव्य गुरु द्रोण शक्र वैश्रवण यमम् ।
वरुण पावक चैव कृप कृष्ण च माधवम् ।
पिनाकपाणिन चैव कथमेतान्न योधये ।
रथ वाहय मे शीघ्र व्येतु ते मानसो ज्वर ।

40

This passage of 27 lines, which has been placed by oversight in this App, is only a part of the full adhy (4 43 10–20), which was wrongly copied here by the scribe of B_3 and subsequently *omitted* by him in its proper place The passage, which is ins after 4 42 28 begins with पार्थसात्राय दास्यामि (cf 4 43 10ᵃ) and ends with अथ पश्यन्तु कौरवा (= 4 43 20ᵈ), followed by a *repetition* of 4 42 28 It needs only to be noted that the passage contains 822*, and 826*, but not 823* (a Southern stanza which is found interpolated in some N MSS. including B_1)

(*sup lin* as above) °पुरमाहन — (L. 24) Cf 4 56 11ᶜᵈ T_1 G विजय प्राप्तवानपि — (L. 25) $M_{3.4}$ समेषु विषमेषु च (for the posterior half) — (L. 26) M_4 आपतत्सु (for शत्रुमध्ये) — After line 29, T_1 ins

मत्नामकथन कीर्ति प्राप्यान्यैश्च प्रकीर्तिताम् ।
एतानि मम नामानि योऽहन्यहनि कीर्तयेत् ।
त न पश्यन्ति सत्त्वानि न त निघ्नन्ति शत्रव ।
अथ पश्य महाबाहो मम वीर्य सुदु सहम् ।

— (L 30) M_4 कृष्ण (for एतान्) — Colophon *Adhy no* 8 42 ($M_{3.4}$ 41)

39

Of the comm only Cr cites स्वयवरे from line 12 — (L. 1) $Ś_1$ K कथम् (for बहून्) — (L. 2) K बहून् (for कथ) K समेत्य, Dn_3 $D_{1.5}$ जेष्यामि $Ś_1$ समेत्य पार्थ सग्रामे $Ś_1$ K सहाय(Ś1 °य)स्तिष्ठामि (?) — (L 3) $Ś_1$ K कौरव्य (for कौन्तेय), and सहायाश्चापि वी° — (L. 4) D_3 अत एव हि तिष्ठामि वीर पार्थ तवाग्रत — (L. 5) K धीमान्, D_3 जिष्णुर् (for पार्थो) K कौन्तेय (for मा भैषी) — (L. 7) $Ś_1$ K D_3 °सखो मम; D_3 सहायता — D_3 reads lines 8–9 after line 11 — (L. 9) B_3 अभवत्, B_{3m} $D_{5-7.9}$ अगात् (for आसीत्) $B_{3.4}$ $D_{4-7.9.10}$ सहायवान् (for तदा मम) $Ś_1$ K D_5 क सहायस्तदाभवत् — K_1 reads lines 10–11 after 13 — (L 14) $Ś_1$ K °व्य रणे रुद्र — $Ś_1$ K_2 B_1 (om the second line) ins after line 15 $D_{4.5.7.9}$ (all om the second line), after line 16 K_1, after line 17

समागताय न वार्ष्णेय योगानामीश्वर प्रभुम् ।
कृष्ण च देवकीपुत्र न भीर्मामुपयास्यति ।

41

Before 4. 45. 1 (that is, after adhy. 44), S ins.:

वैशंपायनः।
कृपस्य तु वचः श्रुत्वा कर्णो राजन्युधां पतिः।
पुनः प्रोवाच सक्रुद्धो गर्हयन्ब्राह्मणं कृपम्।
लक्षयाम्यहमाचार्य भयाद्भक्तिं गतं रिपोः।
भीतेन हि न योद्धव्यमहं योत्स्ये धनंजयम्।
ननु वारुणमाग्नेयं याम्यं वायव्यमेव च।
अस्त्रं ब्रह्मशिरश्चैव सत्त्वहीनस्य ते वृथा।
मित्रकार्यं कृतमिदं पितापुत्रैर्महारथैः।
भर्तृपिण्डश्च निर्दिष्टो यथेष्टं गन्तुमर्हथ।
भिक्षां हरस्व त्वं नित्यं यज्ञाननुचरस्व च।
आमन्त्रणं हि भुङ्क्ष्वाथ मात्मान्युद्धेन भीषय।
मार्गणाग्रे मया मुक्तं निर्दहेत्पृथिवीमिमाम्।
किं पुनः पाण्डुपुत्राणामेकमर्जुनमाहवे।
आगमिष्यन्ति पदवीं मत्त्वा पाण्डवमाश्रिताः।
तानहं निहनिष्यामि भवता गम्यतां गृहम्।
तस्य तद्वचनं श्रुत्वा अश्वत्थामा प्रतापवान्।
उवाच वदतां श्रेष्ठो दुर्योधनमवेक्ष्य च।
ततश्छेत्स्यामि खड्गेन शिरस्ते ब्राह्मणाधम।
वैशंपायन उवाच।
एवमुक्ते तु वचने कर्णेनामित्रसूदन।
अश्वत्थामा ततो राजन्खड्गं जग्राह चर्म च।
गृहीत्वा विमलं खड्गं चर्म चादाय सुप्रभम्।
दुद्राव योद्धुं तं कर्णं सिंहः क्षुद्रमृगं यथा।
तस्मिन्गृहीते खड्गे तु कर्णोऽपि रथिनां वरः।
उच्चचार रथात्तूर्णं गृह्णन्खड्गं स वीर्यवान्।
ततस्तौ तु महावीर्यौ ध्वजाङ्कौ युद्धदुर्मदौ।
अन्योन्यस्य वधं प्रेप्सू सिंहाविव मदोत्कटौ।
तौ दृष्ट्वा सुमहावीर्यौ युद्धाय समवस्थितौ।
दुर्योधनस्ततस्तूर्णं रथादुत्तीर्य वेगवान्।
अभिगम्य गुरोः पुत्रमश्वत्थामानमब्रवीत्।
अश्वत्थामन्गुरोः पुत्र क्षम्यतां द्विजसत्तम।
कर्णो वक्तुं न जानाति ब्राह्मणश्चातिकोपनः।
त्वयि सन्निहितो भारो युद्धस्यास्य विनिश्चयः।
स तथाभिहितो राजन्राज्ञा चैव निवारितः।
स्वरथं प्राप्य तूर्णं वै न च किंचिदुवाच ह।
कर्णोऽपि स्वं रथं तूर्णमारुरोह नृपाज्ञया।

42

After 4. 45. 26, D1 ins.:

कर्ण उवाच।
सदैव द्रोणपुत्रोऽयं पापात्मा पापपौरुषः।
किमत्र कार्यं पार्थेन कथं वा स प्रशस्यते।
अन्यत्र कामान्मोहाद्वा लोभाद्वा बाल्यात्तु केवलात्।
प्रशंसति दुरात्मानं पाण्डवं पापपौरुषम्।
मां चापि निन्दते नित्यं द्विषतस्तस्य काम्यया।
तस्मादयं सुदुर्बुद्धिः पश्यतां मम पौरुषम्।
अश्वत्थामोवाच।
वाक्शूरा ब्राह्मणाः प्रोक्ता बाहुशूराश्च क्षत्रियाः।
धनुषा चार्जुनः शूरः कर्णः शूरो मनोरथैः।
कर्ण उवाच।
सदा भीष्ममते सर्वा वाहिनी ब्राह्मणो गुरुः।
प्रीत्या च पाण्डुपुत्राणां दर्शयन्नहितं तव।
सदा च वायवो यान्ति नित्यं वर्षति वासवः।
अर्जुनं समरे जित्वा लब्ध्वा च विजयं महत्।

43

After 4. 48. 23, S ins.:

ततः स समरे वीरो बीभत्सुः शत्रुपूगहा।
गोपालांश्चोदयामास गाश्चैताश्चोदयेति च।
उत्तरं चाह बीभत्सुर्हर्षयन्पाण्डुनन्दनः।
गवाग्रं समीक्षस्व गाश्चैवाशु निवर्तय।
यावदेते निवर्तन्ते कुरवो जवमास्थिताः।
याम्युत्तरेण गाश्चैताः सैन्यानां च नृपात्मज।
पश्यन्तु कुरवः सर्वे मम वीर्यपराक्रमम्।
ते लाभमिव मन्वानाः कुरवोऽर्जुनमाहवे।
दृष्ट्वा यान्तमदूरस्थं क्षिप्रमन्यपतन्रथैः।
हस्त्यश्वपरिवारेण महताभिविराजता।
योधैः प्रासासिहस्तैश्च चापबाणोद्यतायुधैः।
तान्यनीकान्यदृश्यन्त कुरूणामाततायिनाम्।
सम्पतन्त इवाकाशे विद्युत्वन्तो बलाहकाः।
तानि दृष्ट्वा ह्यनीकानि निवर्तितरथानि च।
पार्थोऽपि वायुवद्धोरः सैन्याग्रं व्यधुनोत्तरः।

41

(L. 2) M सरम्भो (for सक्रुद्धो). — (L. 3) M (except M1) निर्दैष्टो (for निर्दिष्टो). — (L. 10) M आमन्त्रणानि (for °णं हि). — After line 14, T ins.:

[illegible]

42

(L. 2–3)=(var.) 4. 42. 25. — (L. 11)=4. 42. 24ab.

43

(L. 1) T2 धीरो, M शूरो (for वीरो). — (L. 2) T2 M गाश्चोदयति च (for the posterior half). — (L. 10) T1 G1.3 °ना चापि राजता. — M om. line 14. — (L. 15) T1 G1.3 सैन्याग्र°

11

After [illegible] 20, all MSS except Ś1 K D1 [illegible] ins.:

[illegible] सहसा किरीटी
[illegible] शरजालमुग्रम् ।
[illegible]
[illegible] ।
[illegible]
